CC-0. In Public Domain. Digitization by eGangotri

Almira 3
Shelf 3
39

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ल्लापश्चात्कार्याः शुभाः क्रियाः ॥ ए
णसकलानीह चातुर्मास्यगुणान-
॥ गा... कि दानमन्तिम
...चनिय

अथ चातुर्मास्यमाहात्म्यप्रारंभः

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनकराज १९[illegible]

श्रीगणेशायनमः ॥ ॥श्रीसरस्वत्यैनमः ॥ ॥श्रीगुरुचरणारविंदाभ्यांनमः ॥
गव्रतानिस्कु बहून्यपि ॥श्रुतानित्वन्मुखाद्ब्रह्मन्नतृप्तिमधिगच्छति ॥ १ ॥अधुनाश्रोतुलापश्चात्कार्याःशुभाःक्रियाः ॥ ए
॥ ॥ब्रह्मोवाच ॥ ॥शृणुदेवमुनेमत्तश्चातुर्मास्यफलंशुभम् ॥ यत्कृत्वाभारतखंडेनृणांमुक्तिर्नहि चातुर्मास्यगुणान्त-
यंभगवान्संसारोत्तारकारणम् ॥ यस्यस्मरणमात्रेणसर्वपापैःप्रमुच्यते ॥४ ॥ मानुष्यंदुर्लभंलोकेतत्रापिसत्कुलेनतत्रभक्तिश्च
सदयत्वंचतत्रसत्संगमःशुभः ॥ ५ ॥सत्संगमोनयत्रास्तिविष्णुभक्तिव्रतानिच ॥चातुर्मास्यविशेषेणविष्णुव्रतकरःशुभक्रिया
६ ॥चातुर्मास्येव्रतीयस्तुतस्यपुण्यंनिरर्थकम् ॥सर्वतीर्थानिदानानिपुण्यान्यायतनानिच ॥ ७ ॥ विष्णुमाश्रित्यतिष्ठंतिचातु
र्मास्येसमागते ॥ स्कृपुष्टनापिदहनजीवितंतस्यशाभनम् ॥ ८ ॥चातुर्मास्येसमायातेहरिर्यःप्रणमेद्बुधः ॥ कृतार्थास्तस्यविबुधा
यावज्जीवंवरप्रदः ॥ ९ ॥ संप्राप्यमानुषंजन्मचातुर्मास्यपराङ्मुखः ॥ तस्यपापशतान्याहुर्देहस्थानिनसंशयः ॥ १० ॥ मानुष्यं
दुर्लभंलोकेहरिभक्तिश्चदुर्लभा ॥चातुर्मास्येविशेषेणस्कृतदेवजनार्दने ॥ ११ ॥चातुर्मास्येनरःस्नानंप्रातरेवसमाचरेत् ॥सर्व
क्रतुफलंप्राप्यदेववद्दिविमोदते ॥१२ ॥चातुर्मास्येनदीस्नानंकुर्यात्सिद्धिमवाप्नुयात् ॥ तथानिर्झरणेस्नातितडागकूपकास्कच ॥१३
तस्यपापसहस्राणिविलयंयातितत्क्षणात् ॥पुष्करेचप्रयागेवायत्रक्वापिमहाजले ॥ चातुर्मास्येषुयःस्नातिपुण्यसंख्यानविद्य
ते ॥१४ ॥ रेवायांभास्करक्षेत्रेप्राच्यांसागरसंगमे ॥एकाहमपियःस्नातुश्चातुर्मास्येनदोषभाक् ॥१५ ॥दिनत्रयंचयःस्नातिनर्म
दायांसमाहितः ॥स्कृतंदेवजगन्नाथेपापंयातिसहस्रधा ॥१६॥पक्षमेकंतुयःस्नातिगोदावर्यांदिनोदये ॥ सभित्वाकर्मजंदेहंया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ति विष्णुसलोकतां ॥ १७ ॥ तिलोदकेन यः स्नाति तथा चैवामलोदकैः ॥ बिल्वपत्रोदकैश्चैव चातुर्मास्ये न रोगभाक् ॥ १८ ॥ गंगास्म
रति यो नित्यं समुद्रमाप्य समीपतः ॥ तद्गांगेयजलं जातं तेन स्नानं समाचरेत् ॥ १९ ॥ गंगापि देवदेवस्य चरणांगुष्ठवाहिनी ॥ पापहा
सा सदा प्रोक्ता चातुर्मास्ये विशेषतः ॥ २० ॥ यानि पापसहस्राणि विष्णुर्दहति संस्मृतः ॥ तस्मात्पादोदकं शीर्षे चातुर्मास्ये धृतं
शिव ॥ २१ ॥ चातुर्मास्ये जलगतो देवो नारायणो भवेत् ॥ सर्वतीर्थाधिकं स्नानं विष्णुतेजोंशसंगतम् ॥ २२ ॥ स्नाने दशविधं कार्यं
विष्णुनाम महाफलम् ॥ स्नानं देवविशेषेण नरो देवत्वमाप्नुयात् ॥ २३ ॥ विना स्नानेन तु यत्कर्म पुण्यकार्यं मयि शुभम् ॥ क्रियते
निष्फलं ब्रह्मन् तत्प्रगृण्हाति राक्षसाः ॥ २४ ॥ स्नानेन सत्यमाप्नोति स्नानं धर्मः सनातनः ॥ धर्मान्मोक्षफलं प्राप्य पुनर्नैवावसी
दति ॥ २५ ॥ ये चाध्यात्मविदः पुण्या ये च वेदांगपारगाः ॥ सर्वदानप्रदा ये च तेषां स्नानेन शुद्धता ॥ २६ ॥ कृतस्नानस्य च हरिर्देह
माश्रित्यावतिष्ठति ॥ सर्वक्रियाकलापेषु संपूर्णफलदो भवेत् ॥ २७ ॥ सर्वपापविनाशाय देवतातोषणाय च ॥ चातुर्मास्ये जलस्ना
नं सर्वपापक्षयावहम् ॥ २८ ॥ निशायां चैव न स्नायात्संध्यायां ग्रहणं विना ॥ उष्णोदकेन न स्नाने रात्रौ शुद्धिर्न जायते ॥ २९
तु संदर्शनाच्छुद्धिर्विहिता सर्वकर्मसु ॥ चातुर्मास्ये विशेषेण जलशुद्धिस्तु भाविनी ॥ ३० ॥ अशक्त्या तु शरीरस्य
नेन शुध्यति ॥ मंत्रस्नानेन विप्रेंद्र विष्णुपादोदकेन वा ॥ ३१ ॥ नारायणाग्रतः स्नानं क्षेत्रे तीर्थे नदीषु
स्ना चातुर्मास्ये विशेषतः ॥ ३२ ॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मनारदसंवादे चातुर्मास्य
॥ ब्रह्मोवाच ॥ ॥ पितृभ्यस्तर्पणं कुर्याच्छ्रद्धायुक्तेन चेतसा ॥ स्नानावसाने नित्यं च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऋपितॄन्संतर्प्यदेवताः ॥ जपहोमादिकर्माणिकृतानिफलमनंतकं ॥ ३ ॥ गोविंदस्मरणंकृत्वापश्चात्कार्याःशुभाःक्रियाः ॥ ए
षएवर्पितृदेवमनुष्यादिषुतृप्तिदः ॥ ३ ॥ श्रद्धाधर्मयुतानामतथापूतानिकारयेत् ॥ कर्माणिसकलानीह चातुर्मास्येगुणान्न-
रान् ॥ ४ ॥ सत्संगोद्विजभक्तिश्चगुरुदेवाग्नितर्पणम् ॥ गोप्रदानवेदपाठःसत्क्रियासत्यभाषणम् ॥ ५ ॥ गोभूक्तिदानभक्तिश्च
सदाधर्मस्यसाधनम् ॥ कृष्णेस्कतविशेषणनियमोऽपिमहाफलः ॥ ६ ॥ ॥ नारदउवाच ॥ ॥ नियमःकीदृशोब्रह्मन्फलंचनिय
मेनकिम् ॥ नियमेनहरिस्तुष्टोयथाभवतितद्वद ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ नियमश्चक्षकारादीनांक्रियास्कविधिर्विधास्कच ॥ का-
र्येविधिवावतास्तुसातत्प्रयोगान्महास्फलं ॥ ८ एतत्तुषड्वर्गहरणंरिपुनिग्रहणंपरम् ॥ अध्यात्ममूलमेतद्धिपरमसौख्यकारणम् ॥
९ ॥ तत्रातिष्ठतिनियतंस्मासस्याद्याश्रुणाः ॥ विवेकरूपिणःसर्वतद्विष्णोःपरमंपदम् ॥ १० ॥ यज्ञाःसर्वपिकृत्वास्याकृतान्यकृ
तकृत्यता ॥ आत्मजःपूर्वजातानायनज्ञातमिदंपदम् ॥ ११ ॥ तन्मुहूर्तमपिध्यात्वापापजन्मशताद्भवम् ॥ भस्मसाद्यातिविहितंनि
रंजननिषेवणात् ॥ १२ ॥ मत्यहंसकुर्वस्तस्यक्षत्पिपासादिकश्रमम् ॥ सयोगीनियमीनित्यंहरौसतैविशिष्यते ॥ १३ ॥ चातुर्मा
स्येनरोभक्त्यायोगाभ्यासरतानचेत् ॥ तस्यहस्तात्सरित्पत्रंघममृतनात्रसशयः ॥ १४ ॥ मनोनियमितयेनसर्वेच्छासकसदागतम् ॥
तस्यज्ञानेचमोक्षेचकारणमनएवहि ॥ १५ ॥ मनोनियमनेयत्नःकार्यःप्रज्ञावृतासदा ॥ मनसास्फगृहीतेनज्ञानानिरखिलाध्रुवा ॥ १६
तन्मनःक्षमयाग्राह्यंयथावन्हिश्चवारिणा ॥ एकयाक्षमयासर्वोनियमःकथितोबुधे ॥ १७ ॥ सत्यमेकंपरोधर्मःसत्यमेकंपरंतपः ॥
सत्यमेकंपरंज्ञानंसत्येधर्मःप्रतिष्ठितः ॥ १८ ॥ धर्ममूलमहिंसाचमनसातांचचिंतयन् ॥ कर्मणाचतथावाचा ततएतांसमाचरन् ॥ १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥परस्वहरणंचौर्यंसर्वदासर्वमानुषैः ॥चातुर्मास्येविशेषेणब्रह्मदेवस्ववर्जनं ॥२०॥अकृत्यकरणंचैववर्जनीयंसदाबुधैः ॥अ
नीहः सर्वकार्येषुयः सदाविप्रवर्तते ॥२१ ॥सचयोगीमहाप्राज्ञः प्रज्ञाचक्षुरहंनधीः ॥ अहंकारोविषमिदंशरीरवर्तिनंनृणां॥२२
॥ तस्मात्ससर्वदात्याज्यःक्षत्तेदेवविशेषतः ॥अनीहयाजितक्रोधाजितलोभाभवन्नरः ॥ २३ ॥ तस्यपापसहस्राणिदहत्याशुतिस
हस्रधा ॥ मोहमानपराजित्यशमरूपेणशत्रुणा ॥२४॥ विचारणशुभमायान्त्यःसंतोषणतथाहिसः ॥मात्सर्यमृजुभावेनानियच्छेत्स
मुनीश्वरः ॥ २५ ॥ चातुर्मास्येदयाधर्मानिधर्मोभूतविद्रुहम् ॥सर्वदासर्वमासेषुभूतद्रोहंविवर्जयेत् ॥ २६ ॥ एतत्सापसहस्राणां
मूलंप्राहुर्मनीषिणः ॥ तस्मात्सर्वप्रयत्नेनकार्याभूतदयानृभिः ॥२७ ॥सर्वेषामेवभूतानांहरिर्नित्यंहृदिस्थितः ॥ सएवहिपराभू
तोयाभूतद्रोहकारकः ॥२८ ॥यस्मिन्धर्मेदयानैवसधर्मोदूषितोमतः ॥ दयाविनानवित्तानानधर्मोज्ञानमेवच ॥ २९ ॥तस्मात्सं
धृत्मभावेनहरिर्धर्मःसनातनः ॥सेव्यःसत्पुरुषैर्नित्यंचातुर्मास्येविशेषतः ॥ ३० ॥ ॥इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातु
र्मास्यमाहात्म्येनियमविधिमाहात्म्यनामाद्वितीयोऽध्यायः ॥२॥ ॥ब्रह्मोवाच ॥ दानधर्मप्रशंसंतिसर्वधर्मेषुसर्वदा ॥ हरौसु
प्तेविशेषेणदानंब्रह्मत्वकारणम् ॥ १ ॥अन्नंब्रह्मइतिप्रोक्तमन्नेप्राणाःप्रतिष्ठिताः ॥ तस्मादन्नप्रदोनित्यंवारिदश्चभवेन्नरः ॥
२॥ वारिदस्तृप्तिमायातिस्फरवमक्षय्यमन्नदः ॥वार्यन्नयोःसमंदानंनभूतंनभविष्यति ॥ ३ ॥ मणिरत्नप्रवालानांरूप्यहाटकवा
ससाम् ॥अन्येषामपिदानानामन्नदानंविशिष्यते॥ ४ ॥अन्नोदकप्रदानंचगोप्रदानंचनित्यदा ॥वेदपाठोवन्हिहोमश्चातुर्मास्ये
महाफलम् ॥५ ॥ वैकुंठपदवाञ्छाचेद्विष्णुनासहसंगमे ॥सर्वपापक्षयार्थायचातुर्मास्येऽन्नदोभवेत् ॥ ६ ॥ सत्यंसत्यंहिदेवर्षे

२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योक्तं तव नारद ॥ जन्मांतरसहस्रेषु नादत्तमुपतिष्ठति ॥ ७ ॥ तस्मादन्नप्रदानेन सर्वे हृष्यंति जंतवः ॥ देवा अपि स्पृहयंत्येनम
न्नदानप्रदायिनम् ॥ ८ ॥ आज्यं देयं च पात्रेषु श्रेष्ठं यावज्जामिश्रितम् ॥ वज्यदानकरो मर्त्यश्चातुर्मास्ये न मानवः ॥ ९ ॥ भोजनगु
रुविप्राणां घृतदानं च सत्क्रिया ॥ एतानि यस्यांति संति चातुर्मास्ये न मानवः ॥ १० ॥ सद्धर्मः सत्कथा चैव सत्सेवा दर्शनं सताम् ॥ विष्णु
पूजा रतिर्दाने चातुर्मास्येषु दुर्लभा ॥ ११ ॥ पितॄनुद्दिश्य यो मर्त्यश्चातुर्मास्येऽन्नदो भवेत् ॥ सर्वपापविशुद्धात्मा पितृलोकमवाप्नुया
त् ॥ १२ ॥ देवाः सर्वेऽन्नदानेन तृप्ता यच्छंति वांछितम् ॥ पिपीलिकाः पितृक्षुद्रा इक्षमादाय गच्छंति ॥ १३ ॥ रात्रौ दिवानिमिन्द्रं नो
अन्नदानमनुत्तमम् ॥ हरोस्मत्ताहि पापघ्नमवार्यमपि शत्रुषु ॥ १४ ॥ चातुर्मास्ये दुग्धदानं दधितक्रं महाफलम् ॥ जन्मकाले यन्न बद्धः
पिंडस्तद्दानमुत्तमम् ॥ १५ ॥ शाकप्रदाता नरकं यमलोकं न पश्यति ॥ वस्त्रदः सोमलोकं च वसेदाभूतसंप्लवम् ॥ १६ ॥ स्मृतं देवं य-
थाशक्त्या ह्यन्यास्मप्रतिमास्मच ॥ पुष्पवस्त्रप्रदानेन संतानं न विहीयते ॥ १७ ॥ चंदनागुरुधूपं च चातुर्मास्ये प्रयच्छति ॥ पुत्रपौत्र
समायुक्तो विष्णुरूपो भवेन्नरः ॥ १८ ॥ स्मृतं देवं जगन्नाथं फलदानं प्रयच्छति ॥ विप्राय वेदविदुषे यमलोकं न पश्यति ॥ १९ ॥ विद्या-
दानं च गोदानं भूमिदानं प्रयच्छति ॥ विष्णुप्रीत्यर्थमेव हि संतारयति पूर्वजान् ॥ २० ॥ गुडसैंधवतैलादिमधुतिक्ततिलान्नदः ॥ देवता
स्ताः समुद्दिश्य तासां लोकं प्रयाति हि ॥ २१ ॥ चातुर्मास्ये तिलान्दत्वा न भूयः स्तनपो भवेत् ॥ यवप्रदाता वसते वासवलोकमक्षय
म् ॥ २२ ॥ हव्यं च हर ते वन्हौ दानं दद्याद्द्विजातये ॥ गावः स्मपूजिताः कार्याश्चातुर्मास्ये विशेषतः ॥ २३ ॥ यत्किंचित्स्मकृतं कर्म जन्-
न्मावधि स्मसंचितम् ॥ चातुर्मास्ये गते प्राप्ते विसुरत्वाय प्रदीयते ॥ २४ ॥ प्रणश्यति क्षणादेव वचनाद्यस्तु मच्युतः ॥ दिवसे दिवसेत-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चा॰मा॰ स्यवर्द्धतेचप्रतिश्रुतम् ॥ २५ ॥ तस्मान्नैवप्रतिश्राव्यंस्वल्पमप्याशुदीयते ॥ तावद्धिवर्द्धतेदानंयावत्तन्नप्रयच्छति ॥ २६ ॥ श्रो मा॰अ॰
३ माहान्मनुजोलोकेयावत्कोटिगुणंभवेत् ॥ ततोदशगुणावृद्धिश्चातुर्मास्येप्रदातरि ॥ २७ ॥ नरकेपतनंतस्ययावदिन्द्राश्चतुर्द- ३
श ॥ अतस्तत्सर्वदादेयंनरैर्यत्तुप्रतिश्रुतम् ॥ २८ ॥ अन्यस्मैनप्रदातव्यंप्रदत्तंनैवहारयेत् ॥ चातुर्मास्येषुयःशय्यांद्विजायार्थिनेप्र
यच्छति ॥ २९ ॥ वेदोक्तेनविधानेननसयातियमालयम् ॥ आसनंवारिपात्रंचभाजनंताम्रभाजनम् ॥ ३० ॥ चातुर्मास्येप्रयत्नेनदा
नंवित्तानुसारतः ॥ सर्वदानेनाधिमेभ्योदद्यात्सोजगद्गुरौ ॥ ३१ ॥ आत्मानंपूर्वजैःसार्द्धंसमुद्धरतिपातकात् ॥ गोभूमिश्चतिलपात्रंच-
दीपदानमनुत्तमम् ॥ ३२ ॥ दद्याद्द्विजातयेमुक्तोजायतेसऋणत्रयात् ॥ ३३ ॥ सविश्वकर्ताभुवनेशुगोप्तासयज्ञभुक्सर्वफलप्रदश्च
॥ दानानिवृत्तेष्वधिदैवतंचयस्तत्समुद्दिश्यददातिमुक्तः ॥ ३४ ॥ ॥ इतिश्रीस्कन्दपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येदान
महिमावर्णनंनामतृतीयोऽध्यायः ३ ॥ ॥ ब्रह्मोवाच ॥ ॥ इष्टवस्तुप्रदोविष्णुर्लोकेश्वेष्टरुचिःसदा ॥ तस्मात्सर्वप्रयत्नेनचातुर्मा
स्येत्यजेच्चयत् ॥ १ ॥ नारायणस्यप्रीत्यर्थंतुदेवाःक्षय्यमाप्यते ॥ मर्त्यस्त्यजतियच्छ्रद्धावान् सोऽनन्तफलभाग्भवेत् ॥ २ ॥ कांस्यभाज
नत्यागाज्जायतेभूपतिर्भुवि ॥ पालाशपत्रेभुञ्जानोब्रह्मभूयस्त्वमश्नुते ॥ ३ ॥ ताम्रपात्रेणभुञ्जीतकदाचिद्धागृहीनरः ॥ चातुर्मा-
स्यविशेषेणताम्रपात्रंविवर्जयेत् ॥ ४ ॥ अर्कपत्रेषुभुञ्जानोऽनुपमंलभतेफलम् ॥ वटपत्रेषुभोक्तव्यंचातुर्मास्येविशेषतः ॥ ५ ॥ अ
श्वत्थपत्रसंभोगःकार्योबुधजनैःसदा ॥ एकान्नभोगीराजास्यात्सफलेभूमिमण्डले ॥ ६ ॥ तथाचलवणत्यागात्सुभगोजायतेनरः ॥ ३
गोधूमान्नपरित्यागाज्जायतेजनवल्लभः ॥ ७ ॥ अशाकभोगीदीर्घायुश्चातुर्मास्येऽभिजायते ॥ रसत्यागान्महाप्राज्ञोमधुत्यागा

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सुभगो जायते नरः ॥ गोधूमान्नपरित्यागाज्जायते जनवल्लभः ॥ ७ ॥ अशाकभोगी दीर्घायुश्चातुर्मास्यां भिजायते ॥ रस
त्यागान्महाप्राणी मधुत्यागी सुलोचनः ॥ ८ ॥ मुद्गत्यागाद्भवेन्मूर्तीराजमाषान्नुनाद्यता ॥ अम्लाद्वारिस्तंडुलत्यागाच्चातुर्मास्य
भिजायते ॥ ९ ॥ फलत्यागाद्बहुसुतस्तैलत्यागात्सुरूपता ॥ जानीतु वरिस्त्वत्यागाद्बलवीर्यः सदैव हि ॥ १० ॥ मार्गमासपरित्या
गात्स्वरकचनपश्यति ॥ शोकरस्यपरित्यागात्ब्रह्मत्ववा समवाप्यते ॥ ११ ॥ ज्ञानं लावकसत्यागादाज्यत्यागमहसुखम् ॥ आस
वस परित्यज्य मुक्तिस्तस्य न दुर्लभा ॥ १२ ॥ सबलः कनकत्यागात्क्रोध्यत्यागेन मानुषः ॥ दधिदुग्धपरित्यागी गोलोके सुखभाग्भव
त् ॥ १३ ॥ ब्रह्मापायससत्यागात्तुलसिमत्यागान्महेश्वरः ॥ कदर्पधूपसत्यागाम्मादकत्याजकः सुखी ॥ १४ ॥ गृहाश्रमपरित्यागी
वाह्याश्रमनिषेवकः ॥ चातुर्मास्ये हरिप्रीत्ये न मातुर्जठरेश्शयः ॥ १५ ॥ नृपो मरीचसत्यागात्त्रुठीत्यागेन सत्कविः ॥ शर्करायाः परित्या
गाज्जायते राजपूजितः ॥ १६ ॥ गुडत्यागान्महाभूतिस्त्वयादाडिमवर्जनात् ॥ रक्तवस्त्रपरित्यागाज्जायते जनवल्लभः ॥ १७ ॥ पट्टकू
लपरित्यागादक्षय्यस्वर्गमाप्यते ॥ माषान्नचणकान्नस्यत्यागान्नैवपुनर्भवेः ॥ १८ ॥ कृष्णवस्त्रं सदात्याज्यं चातुर्मास्ये विशेषतः
॥ सूर्यसंदर्शनाच्छुद्धिर्नीलीवस्त्रस्य दर्शनात् ॥ १९ ॥ चंदनस्य परित्यागाद्गंधर्वलोकमश्नुते ॥ कर्पूरस्य परित्यागाद्यावज्जीवमहाध
नी ॥ २० ॥ कुंकुमस्य परित्यागान्नैव पश्ये यमालयम् ॥ केशरस्य परित्यागान्मनुष्यो राजवल्लभः ॥ २१ ॥ यक्षकर्दमसत्यागाद्ब्रह्म
लोके महीयते ॥ ज्ञानिपुष्पपरित्यागाच्छय्यात्यागे महासुखम् ॥ २२ ॥ भार्यावियोगं नाप्नोति चातुर्मास्येन संशयः ॥ अलीकवादि
सत्यागान्मोक्षद्वारमपावृतम् ॥ २३ ॥ परमर्मप्रकाशश्च सद्यः पापसमागमः ॥ चातुर्मास्ये हरौ सुप्ते परनिंदां विवर्जयेत् ॥ २४ ॥ पर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चा०मा० निंदामहापापपरनिंदामहाभयं ॥ परनिंदामहादुःखंनतस्याःपातकंपरम् ॥ २५ ॥ केवलंनिंदयेत्स्वंतसापंलभंतगुरु ॥ यथा मा०अ०
५ शृण्वानएवास्यासातकीनततःपरः ॥ २६ ॥ केशसंस्कारसंत्यागात्तापत्रयविवर्जितः ॥ नखरोमधरोयस्तु हरौस्तु तविशेषतः ॥ ४
॥ २७ ॥ दिवसेदिवसेतस्यगंगास्नानफलंलभेत् ॥ २८ ॥ सर्वोपायंविष्णुरेवप्रसादोयोगिध्येयःप्रवरैःसर्ववर्णैः ॥ विष्णोर्नाम्नामुच्य
तेघोरबंधाच्चातुर्मास्येस्मर्यतेसोविशेषात् ॥ २९ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येइष्टवस्तुपरि-
त्यागमहिमावर्णनंनामचतुर्थोऽध्यायः ४ ॥ ॥ नारदउवाच ॥ ॥ कदाविधिर्निषेधोवाकर्तव्योकृष्णसन्निधौ ॥ युष्मद्वाक्या
मृतंपीत्वातृप्तिर्मेमनविद्यते ॥ १ ॥ ॥ ब्रह्मोवाच ॥ ॥ कर्कसंक्रांतिदिवसेविष्णुंसंपूज्यभक्तितः ॥ फलैरर्घ्यःप्रदातव्यःशुक्लजंबूफ
लैःशुभैः ॥ २ ॥ जंबुद्वीपस्यसंज्ञेयंफलंनचाक्विजायते ॥ मंत्रेणानेनविप्रेंद्रश्रद्धाधर्मसमन्वितः ३ ॥ षण्मासाभ्यंतरंसृष्टंकर्मब्रह्मापिभ्र
वेन्मम ॥ तन्मयावार्षिकंदेवायस्त्वयमात्मानिवेदितः ॥ ४ ॥ इतिमंत्रेणार्घ्यं । ॥ ततोविधिर्निषेधोवाग्राह्योभक्त्याहरेःपरः ॥ चातुर्मा
स्यसमायातिसर्वलोकमहासुखं ॥ ५ ॥ विधिर्वेदविधिःकार्योनिषेधोनियमोमतः ॥ विधिश्चैवनिषेधश्चद्वावेतौविष्णुरेवहि ॥ ६ ॥
तस्मात्सर्वप्रयत्नेनसेव्यएवजनार्दनः ॥ विष्णोःकथाविष्णुपूजाध्यानंविष्णोर्नतिस्तथा ॥ ७ ॥ सर्वमेवहरिःप्रोक्तायःकुर्यात्सभुक्ति-
भाक् ॥ वर्णाश्रमविधिर्मूर्तिःसत्योविष्णुःसनातनः ॥ ८ ॥ चातुर्मास्येविशेषेणजन्मकष्टादिनाशनम् ॥ हरिरेवव्रताद्धाताप्राप्नोदहनका
रणम् ॥ देहोयेनतपसाशोध्यःसप्तंदेवतपोनिधिम् ॥ ९ ॥ नारदउवाच ॥ किंव्रतंकिंतपःप्रोक्तंब्रह्मन्ब्रूहिसविस्तरम् ॥ कृष्णदेवम ६
याकार्यंकृतंयच्चमहाफलम् ॥ १० ॥ ॥ ब्रह्मोवाच ॥ ॥ व्रतंविष्णुव्रतंविद्धिविष्णुभक्तिसमन्वितम् ॥ तपश्चधर्मंदातिलेकृच्छ्रा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिकमथापिवा ॥११॥ शृणुव्रतस्यमाहात्म्यंवक्ष्यामिप्रथमंतव ॥ ब्रह्मचर्यव्रतंसारंव्रतानामुत्तमंव्रतं ॥१२॥ ब्रह्मचर्यंतपःसारं
ब्रह्मचर्यमहाफलम् ॥ क्रियासकसकलास्त्वेवब्रह्मचर्यंविवर्द्धयेत ॥१३॥ ब्रह्मचर्यप्रभावेणतपउग्रंप्रवर्त्तते ॥ ब्रह्मचर्यात्परंनास्तिध
र्मसाधनमुत्तमम् ॥ १४ ॥ चातुर्मास्येविशेषेणसंप्रदंव्रगुणोत्तरम् ॥ महाव्रतमिदंलोकेतन्निबोधसदाद्विज ॥ १५ ॥ नारायणामि
दंकर्मयःकरोतिनलिप्यते ॥ शतत्रयंषष्टियुतंदिनमाहुश्चवत्सरं ॥ १६ ॥ तत्रनारायणोदेवःपूज्यतेव्रतकारिभिः ॥ सात्विकयामसुर्की
देवंकारयिष्यामिनिश्चयः ॥ १७ ॥ कुरुतेतद्व्रतंप्राहुःसंप्रदंव्रगुणोत्तरम् ॥ वन्हिहोमाद्विप्रभक्तिःश्रद्धाधर्ममतिःशुभा ॥ १८ ॥ स
त्संगोविष्णुपूजाचसत्यवादोदयाहृदि ॥ आर्जवंमधुरावाणीसच्चरित्रेसदारतिः ॥ १९ ॥ वेदपाठस्तथास्तेयमहिंसाह्रीःक्षमादमः ॥
निर्लोभताक्रोधताचनिर्मोहायमतारतिः ॥ २० ॥ श्रुतिक्रियापरज्ञानकृष्णार्पितमनोगतिः ॥ एतानियस्यतिष्ठंतिव्रतानिब्रह्मविन्न
म ॥ २१ ॥ जीवन्मुक्तोनरःप्रोक्तोनैवलिप्यातिपातकैः व्रतकृतसकृदपिसदेवहिमहाफलम् ॥ २२ ॥ चातुर्मास्येविशेषेणब्रह्मचर्या
दिसेवने ॥ अव्रतेनगतंयेषांचातुर्मास्यंसदानृणाम् ॥ २३ ॥ धर्मस्तेषांमृथासर्वइस्तेवज्ञःपरकीर्तितः ॥ सर्वेषामेववर्णानांव्रतचर्या
महाफलम् ॥ २४ ॥ स्वल्पापिविहितावत्सचातुर्मास्येकरवप्रदा ॥ मवस्यदृश्यतेविष्णुर्व्रतसेवापरैर्नृभिः ॥ २५ ॥ चातुर्मास्येसमाया
तेपालयेत्तत्प्रयत्नतः ॥ २६ ॥ भजस्वविष्णुंद्विजवन्दितांघ्रिंवेदप्रभेदमयमूर्तिमजंविराजम् ॥ यत्प्रसादाद्भवतिमोक्षमहातरुस्य
स्तापनंचास्यतिनंचाऽर्कसमुद्भवतम् ॥ २७ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मासमाहात्म्येव्रतमाहिमावर्णनंना
मपंचमोऽध्यायः ५ ॥ ॥ ब्रह्मोवाच ॥ ॥ तपःशृणुष्वविप्रेंद्रविस्तरेणमहामते ॥ यस्यश्रवणमात्रेणचातुर्मास्येघनाशनम् ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१ ॥ षोडशेनोपचारेण विष्णोः पूजा सदा तपः ॥ तत्कृत्स्नं जगन्नाथे महत्तपउदाहृतम् ॥ २ ॥ करणं पंचयज्ञानां सततं पंच एव हि ॥ त
न्निवेद्य हरौ चैव चातुर्मास्ये महत्तपः ॥ ३ ॥ चातुर्मास्ये हरिप्रीत्यै तन्निवेद्यं महत्तपः ॥ ऋतुदानं गृहस्थस्य तप एव सदैव हि ॥ ४ ॥ चा
तुर्मास्ये हरिप्रीत्यै तन्निषेव्यं महत्तमः ॥ सत्यवादस्तपो नित्यं प्राणिनां सुविदुर्लभम् ॥ ५ ॥ स्वप्ते दवपतौ कुर्वन्ननंतफलभाग्भवेत् ॥
अहिंसादिगुणानां च पालनं सततं तपः ॥ ६ ॥ चातुर्मास्ये त्यक्तवैरं महत्तपउदारधीः ॥ तप एव महन्मर्त्यैः पंचायतनपूजनम् ॥ ७ ॥
चातुर्मास्ये विशेषेण हरिप्रीत्या समाचरेत् ॥ ८ ॥ ॥ नारद उवाच ॥ ॥ पंचायतनसंज्ञेयं कस्या कासा कथं भवेत् ॥ कथं पूजा च क
र्तव्या विस्तरेणाशु तद्वद ॥ ९ ॥ ॥ ब्रह्मोवाच ॥ ॥ प्रातर्मध्याह्नपूजायां मध्ये पूज्यो रविः सदा ॥ रात्रौ मध्ये भवेच्चंद्रस्तद्वर्णैः कुसुमैः
शुभैः ॥ १० ॥ वह्निकोणे तु हेरंबः सर्वविघ्नोपशांतये ॥ रक्तचंदनपुष्पैश्च चातुर्मास्ये विशेषतः ॥ ११ ॥ नैर्ऋते दलमास्थाय भगवा
न् दुःखदर्पहा ॥ गृहस्थस्य सदा शत्रुविनाशं विदधाति सः १२ नैर्ऋत्यकोणगो विष्णुः पूजयेत्सर्वदा बुधः ॥ स्रग्गंधचंदनैः पुष्पैः नैवेद्यै
श्चातिशोभनैः ॥ १३ ॥ गात्रजा चोच्यते कोणे पूजनीया सदा बुधैः ॥ पुत्रपौत्रप्रवृद्ध्यर्थं यस्कमनोभिमनोहरैः ॥ १४ ॥ ऐशान्यां भगवा
न्रुद्रः श्वेतपुष्पैः सदार्चितः ॥ अपमृत्युविनाशाय सर्वदोषापनुत्तये ॥ १५ ॥ जागर्ति महिमा यस्य ब्रह्माद्यैर्न विलुप्यते ॥ पंचायत
नमेतद्धि पूज्यते गृहमेधिभिः ॥ तप एतत्सदा कार्यं चातुर्मास्ये महाफलम् ॥ १६ ॥ पर्वकालेषु सर्वेषु दानं देयं तपः सदा ॥ चातुर्मा
स्ये विशेषेण तदनंतं प्रजायते ॥ १७ ॥ शौचं तु द्विविधं ग्राह्यं बाह्यमाभ्यंतरं सदा ॥ जलशौचं तथा बाह्यं श्रद्धया चांतरं भवेत् ॥ १८ ॥ इं ५
द्रियाणां ग्रहः कार्यस्तपसो लक्षणं परम् ॥ निवृत्तेंद्रियलोल्यं च चातुर्मास्ये महत्तपः ॥ १९ ॥ इंद्रियाश्वान्स नियम्य सततं स्ववशं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धते ॥ नरकेत्वथ्यतेप्राण्यैस्तैरेवोसथगामिभिः ॥ २० ॥ ममतारूपिणीयाहींदुष्टांनिर्भर्त्स्यनिग्रहेत् ॥ तपएवसदापुंसांचातु
र्मास्येधिगौरवम् २१ कामएषमहाशत्रुस्तमेकंनिर्जयेद्दृढम् ॥ जितकामामहात्मानस्तैर्जितंनिखिलंजगत् ॥ २२ ॥ एतच्चतपस
मूलंतपसामूलमेवतत् ॥ सर्वदाकामविजयः संकल्पविजयस्तपः ॥ २३ ॥ तदेवाहिपरंज्ञानंकामायनप्रजायते ॥ महत्तपस्तदे
वाहुश्चातुर्मास्येफलोत्तमम् ॥ २४ ॥ लोभः सदापरित्याज्यः पापलोभंसमास्थितम् ॥ तपस्तस्यैवविजयश्चातुर्मास्येविशेषतः
॥ २५ ॥ मोहः सदाविवेकेश्चवर्जनीयः प्रयत्नतः ॥ तेनत्यक्तानराज्ञानंनज्ञानंमोहसंश्रयात् ॥ २६ ॥ मदएवमनुष्याणांशरीरस्थोम
हारिपुः ॥ सदासएवनिग्राह्यः स्कंदेवविशेषतः ॥ २७ ॥ मानः सर्वेषुभूतेषुवसत्यघभयावहः ॥ क्षमयातंविनिर्जित्यचातुर्मास्येगु
णाधिकः ॥ २८ ॥ मात्सर्यंनिर्जयेत्प्राज्ञोमहापातककारणम् ॥ चातुर्मास्येजितंतेनत्रैलोक्यममरैः सह ॥ २९ ॥ अहंकारसमाक्रा
न्तामुनयाविनितक्रियाः ॥ धर्ममार्गपरित्यज्यकुर्वन्त्युन्मार्गजाक्रियाम् ॥ ३० ॥ अहंकारपरित्यज्यसततंसुखमाप्नुयात् ॥ चातुर्मा
स्येविशेषेणतस्यत्यागोमहाफलम् ॥ ३१ ॥ एतद्धितपसोमूलंयद्वृतन्मनसस्त्यजेत् ॥ त्यक्तेष्वेतेषुसर्वेषुपरब्रह्ममयोभवेत् ॥ ३२
॥ प्रथमंकायशुद्ध्यर्थंप्राजापत्यंसमाचरेत् शयनेदेवदेवस्यविशेषेणमहत्तपः ॥ ३३ ॥ हरेरस्तशयनेनित्यमेकोनरमुपोषणम्
॥ यः करोतिनरोभक्त्यानसगच्छेद्यमालयम् ॥ ३४ ॥ हरिस्वापेनरानित्यमेकभक्तंसमाचरेत् ॥ दिवसेदिवसेतस्यद्वादशाहफल
लभेत् ॥ ३५ ॥ चातुर्मास्येनरायस्तुशाकाहारपरोयदि ॥ पुण्यंक्रतुसहस्राणांजायतेनात्रसंशयः ॥ ३६ ॥ चातुर्मास्येनरानित्यंचा
न्द्रायणव्रतंचरेत् ॥ मासेकमासतत्पुण्यंवर्णितुंनैवशक्यते ॥ ३७ ॥ स्कंदेवचपाराकंयः करोतिविशुद्धधीः ॥ नारीपापद्वयमुक्ता

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चा॰मा॰ शतजन्माघनाशनम् ॥ ३८ ॥ कृच्छ्रसेवी भवेद्यस्तु स्वपे देवे जनार्दने ॥ पापनाशं विनिर्धूय वैकुण्ठे गणतां व्रजेत् ॥ ३९ ॥ तप्तकृ मा॰अ॰
६ च्छ्रपरो यस्तु स्वपे देवे जनार्दने ॥ कीर्तिं संप्राप्य वा पुत्रं विष्णुसायुज्यतां व्रजेत् ॥ ४० ॥ दुग्धाहारपरो यस्तु चातुर्मास्येऽभिजा- ६
यते ॥ तस्य पापसहस्राणि विलयं यान्ति हि द्रुतः ॥ ४१ ॥ मृतान्नाशनकृद्धीरश्चातुर्मास्ये नरो यदि ॥ निर्धूय सकलं पापं वैकुण्ठपद-
माप्नुयात् ॥ ४२ ॥ एकान्नाशनकृन्मर्त्यो न रोगैरभिभूयते ॥ अक्षारलवणाशी च चातुर्मास्ये न पापभाक् ॥ ४३ ॥ कृताहारो महत्पापै-
र्निर्मुक्तो जायते ध्रुवम् ॥ हरिमुद्दिश्य मासं तु चतुष्टुं च न संशयः ॥ ४४ ॥ कन्दमूलाशनकरः पूर्वजान् सह आत्मना ॥ उद्धृत्य नरकात् घो-
रात् याति विष्णुसलोकताम् ॥ ४५ ॥ नित्याम्बुप्राशनकरश्चातुर्मास्ये यदा भवेत् ॥ दिने दिनेऽश्वमेधस्य फलमाप्नोत्यसंशयः ॥ ४६
॥ शीतवृष्टिसहायस्तु चातुर्मास्ये नरो भवेत् ॥ हरिप्रीत्यै जगन्नाथस्तस्यात्मानं प्रयच्छति ॥ ४७ ॥ महापाराकसंज्ञं तु महत्तपउदा-
हृतम् ॥ मासैकमुपवासेन सर्वं पूर्णं प्रजायते ॥ ४८ ॥ देवस्वापदिनादौ तु यावत्सा विष्णुद्वादशी ॥ पवित्रद्वादशी पूर्वं यावच्छ्रवणद्वा-
दशी ॥ ४९ ॥ महापाराकमेतद्धि द्वितीयं परकीर्तितम् ॥ श्रवणद्वादशीपूर्वं प्राप्तिश्चाश्विनद्वादशी ॥ ५० ॥ महापाराकं तृतीयं प्राज्ञै-
श्च समुदाहृतम् ॥ आश्विनद्वादशी चादौ प्रासादेवस्य बोधिनी ॥ ५१ ॥ महापाराकमेतद्धि चतुर्थं परिकथ्यते ॥ एतेषामेकमपि च वना-
री वा पुरुषोऽपि वा ॥ ५२ ॥ यः करोति महाभक्त्या स च वै विष्णुः सनातनः ॥ इदं च सर्वतपसां महत्तपउदाहृतम् ॥ ५३ ॥ दुष्करं दुर्लभं लो-
के चातुर्मास्यं मखाधिकम् ॥ दिवसे दिवसे तस्य यज्ञायुतफलं स्मृतम् ॥ ५४ ॥ महत्तप इदं येन कृतं जगति दुर्लभम् ॥ इदमेवं महापु- ६
ण्यमिदमेवं महत्तरम् ॥ ५५ ॥ इदमेव परं श्रेयो महापाराकसेवनम् ॥ नारायणो वसेद्देहे ज्ञानं तस्य प्रजायते ॥ ५६ ॥ जीवन्मुक्तः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सम्भवति महापातककारकः ॥ तावद्गर्जंति पापानि नरकास्तावदेव हि ॥ ५७ ॥ तावन्मायासहस्राणि यावन्मासोपवासकः ॥ चातु
र्मास्युपवासी यो यस्य प्राणिको भवेत् ॥ ५८ ॥ सोपि हत्यासहस्राणि त्यक्त्वा निष्कल्मषो भवेत् ॥ यइदं श्रावयेन्मर्त्यो यः पठेत्सततं
स्वयम् ॥ ५९ ॥ सोपि वाचस्पतिसमः फलप्राप्तो ह्यसंशयः ॥ ६० ॥ इदं पुराणं परमं पवित्रं शृण्वन्गृणन् पापविशुद्धिहेतुः ॥ ना
रायणं तं मनसा विचिंत्य मृतोऽपि गच्छत्यमृतस्कराधिकम् ॥ ६१ ॥ ॥ इति श्रीस्कंदपुराणे चातुर्मास्यमाहात्म्ये ब्रह्मनारदसंवा
दे तपोमहिमावर्णनं नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥ नारद उवाच ॥ ॥ उपचारैः षोडशभिः पूजनं क्रियते कथम् ॥ तके षोडश भावाः स्यु
र्नित्यं वा शयने हरेः ॥ १ ॥ एतद्विस्तरतो ब्रूहि पृच्छतो मे प्रजापते ॥ तव प्रसादमासाद्य जगत्पूज्यो भवाम्यहम् ॥ २ ॥ ॥ ब्रह्मोवाच ॥
विष्णुभक्तिर्द्विदा कार्या वेदशास्त्रविधानतः ॥ वेदमूलमिदं सर्वं वेदो विष्णुः सनातनः ॥ ३ ॥ ते वेदा ब्राह्मणाधारा ब्राह्मणाश्चाग्निदे
वताः ॥ अस्मात्प्रास्ताहुतिर्विप्रो यज्ञद्रव्ययजन्सदा ॥ ४ ॥ जगत्संधारयत्सर्वं विष्णुपूजासमः सदा ॥ नारायणः स्मृतो ध्यातः क्लेशदुः
खादिनाशनः ॥ ५ ॥ चातुर्मास्ये विशेषेण जलरूपगतो हरिः ॥ जलादन्नानि जायंते जगतां तृप्तिहेतवे ॥ ६ ॥ विष्णुदेहाशसंभू
तं तदन्नं ब्रह्म इष्यते ॥ तदन्नं विष्णवे दत्वा ह्यावाहनपुरःसरम् ॥ ७ ॥ पुनर्जन्मजराक्लेशसंस्कारैर्नाभिभूयते ॥ आकाशसंभवाद्दे
ह एक एव पुराभवत् ॥ ८ ॥ ततो यजुःसामसज्ञा ऋग्वेदः प्रापभूतये ॥ ऋग्वेदोऽभिहितः पूर्वं यजुः सहस्रशीर्षेति च ॥ ९ ॥ षोडशर्च
महासूक्तं नारायणमयं परम् ॥ तस्याऽपि पाठमात्रेण ब्रह्महत्या निवर्तते ॥ १० ॥ विप्रः पूर्वं न्यसेद्देहे स्मृतसूक्तेन निजे बुधः ॥ ततस्तु
प्रतिमायां च शालग्रामे विशेषतः ॥ ११ ॥ क्रमेण च ततः कुर्यात्सम्यगावाहनादिकं ॥ आवाह्य सकलं रूपं वैकुंठध्यानसंवितम् ॥ १२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कौस्तुभेनविराजंतंसूर्यकोटिसमप्रभम् ॥ दंडहस्तंशिखासूत्रसहितंपीतवाससम् ॥ १३ ॥ महासन्न्यासिनंध्यायेच्चातुर्मा-
स्यविशेषतः ॥ एवंरूपमयंविष्णुंसर्वपापौघहारिणम् ॥ १४ ॥ आवाहयेन्नपुरतोध्यानसत्वंद्विजोत्तम ॥ ऋचाप्रथमयाचास्यओं
काराद्वावुदीर्णया ॥ १५ ॥ द्वितीययाचासनंचपार्श्वदेवसमन्वितम् ॥ सौवर्णान्यासनान्येषांमनसापरिचिंतयेत् ॥ १६ ॥ चिंतनैर्भ-
क्तियोगेनपरिपूर्णंचितद्भवेत् ॥ पाद्यंतृतीययाकार्यंगंगातत्रस्मरेद्बुधः ॥ १७ ॥ अर्घःकार्यस्ततोविष्णोःसरिद्भिःसप्तसागरैः ॥ पुनरा
चमनंकार्यममृतेनजगत्पतेः ॥ १८ ॥ त्रिभिराचमनैःशुद्धिर्ब्राह्मणस्यनिगद्यते ॥ अद्भिस्त्वप्रकृतिस्थाभिर्हीनाभिःफेनबुद्बुदैः ॥ १९
॥ हृत्कंठतालुकाभिश्चयथावर्णाद्विजातयः ॥ शुद्ध्येरन्स्त्रीचशूद्रश्चसकृत्स्पृष्टाभिरंततः ॥ २० ॥ पंचम्याचमनंकार्यंभक्तियुक्तेनचेत
सा ॥ भक्तिग्राह्योहृषीकेशोभक्त्यात्मानंप्रयच्छति ॥ २१ ॥ ततःसुवासितैस्तोयैःसर्वौषधिसमन्वितैः ॥ शेषोदकेस्वर्णघटैःस्नानं
देवस्यकारयेत् ॥ २२ ॥ तीर्थोदकैःशुद्धयाचमनसासमुपाहृतैः ॥ अश्रद्धयारत्नराशिःप्रदत्तोनिष्फलोभवेत् ॥ २३ ॥ वार्यषिष्यद्
यादत्तमनंतत्वायकल्पते ॥ चातुर्मास्येविशेषेणश्रद्धयापूज्यतेनरः ॥ २४ ॥ श्रद्धास्नानंततःकार्यंपुनराचमनंभवेत् ॥ दद्याच्चवाससी
स्वर्णसहितेभक्तिशक्तितः ॥ २५ ॥ आच्छादितंजगत्सर्वंवस्त्रेणाच्छादितोहरिः ॥ चातुर्मास्येविशेषेणवस्त्रदानंमहाफलम् ॥ २६ ॥
पुनराचमनंदेयंयतोयंविष्णुरूपिणे ॥ वस्त्रदानंचसप्तम्याकार्यंविष्णोर्मुनीश्वर ॥ २७ ॥ यज्ञोपवीतमष्टम्यातत्राध्यात्मतयाशृणु ॥
सूर्यकोटिसमस्पर्शंतेजसाभास्करंतथा ॥ २८ ॥ क्रोधाविष्कृतेविप्रेतुतडित्कोटिसमप्रभम् ॥ सूर्येंदुवह्निसंयोगाद्गुणत्रयसमन्वितं ॥
२९ ॥ त्रयीमयंब्रह्मविष्णुरुद्ररूपंत्रिविष्टपम् ॥ यस्यप्रभावाद्विप्रेंद्रमानवोद्विजउच्यते ॥ ३० ॥ जन्मनाजायतेशूद्रःसंस्काराद्द्विजउ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च्यते ।शापानुग्रहसामर्थ्यंतथाक्रोधःप्रसन्नता ॥३१॥त्रैलोक्यप्रवरत्वंचब्राह्मणादेवजायते॥नब्राह्मणसमोबंधुर्नब्राह्म
णसमागतिः ॥३२॥नब्राह्मणसमः कश्चित्त्रैलोक्येसचराचरे॥दत्तोपवीतब्रह्मण्येस्कंतेदेवेजनार्दने॥३३॥सर्वंजगद्ब्रह्म
मयंसंजातंनात्रसंशयः॥नवम्यांचस्कलेपश्चकर्तव्योयज्ञमूर्तये॥३४॥स्कयक्षकर्दमैर्लिप्तोविष्णुस्तेनजगद्गुरुः॥तेनाप्यायित
मेतद्धिवासितंयशसाजगत्॥३५॥तेजसाभास्वरोलोकेदेववत्प्राप्यमानवः॥ब्रह्मलोकादिकेलोकेमोदतेचंदनप्रदः॥३६
॥चंदनालेपस्कभगंविष्णुपश्यंतिमानवाः॥नतेयमपुरंयांतिचातुर्मास्येविशेषतः॥३७॥दशम्यांपुष्पपूजाचभक्तिपूजात
थैवच॥पुष्पेचैवसदालक्ष्मीर्वसत्येवनिरंतरं॥३८॥लक्ष्म्यासर्वत्रगामिन्यादोषानैवप्रजायते॥यथासर्वमयोविष्णुर्नदोषरनु
भूयते॥३९॥तथासर्वमयालक्ष्मीःसतीत्वान्नैवहीयते॥प्रतिमासंचसर्वासुसर्वभूतेषुनित्यदा॥४०॥मनुष्यदेवपितृषुपुष्पपू
जाविधीयते॥पुष्पैःसंपूजितोयेनहरिरेकःश्रियासह॥४१॥आब्रह्मस्तंभपर्यंतंपूजितंतेनवैजगत्॥अतःस्कपुष्पैःकुसुमैर्वि
ष्णुंसंपूजयेत्सदा॥४२॥चातुर्मास्येविशेषेणभक्तियुक्तःसदाशुचिः॥भक्त्यास्कविहिताब्रह्मन्पुष्पपूजानरैर्यदि॥४३॥यं
यंकाममभिध्यायन्तस्यसिद्धिर्निरंतरा॥पुष्पैरुपचितावान्येयद्यन्येप्रणामंतिच॥४४॥तेषामप्यक्षयालोकाश्चातुर्मास्ये धि
कफलम्॥एकादश्यांधूपदानंकर्तव्यंतत्रयेहरौ॥४५॥वनस्पतिरसोदिव्योगंधाढ्योगंधउत्तमः॥आघ्रेयःसर्वदेवानांधूपोऽयं
प्रतिगृह्यताम्॥४६॥इमंमंत्रंसमुच्चार्यधूपमागरुजंशुभम्॥दद्याद्भगवतेनित्यंचातुर्मास्येमहाफलम्॥४७॥कर्पूरचंदनद
लैःसितामधुसमन्वितम्॥मार्जारजटाभिःसहितंस्कंदेवेऽथसत्तम॥४८॥देवाघ्राणेनतुष्यंतिधूपघ्राणंहरंशुभम्॥द्वाद-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चा॰ मा॰ श्यांदीपदानंतु कर्तव्यंमुक्तिमिच्छुभिः ॥ ४९ ॥ दीपः सर्वेषुकार्येषु प्रथमस्तेजसांपतिः ॥ दीपस्तमोधनाशायदीपः कांतिंप्रय सा॰अ॰
८ च्छति ॥ ५० ॥ तस्माद्दीपप्रदानेनप्रीयतांमेजनार्दनः ॥ इमंपौराणजंमन्त्रंऋचावेदसमन्वितम् ॥ दीपप्रदानेसकलंप्रयुक्तंनाशयेद ७
घं ॥ ५१ ॥ चातुर्मास्येदीपदानंकुरुतेयोहरेःपुरः ॥ तस्यपापमयोराशिर्निमेषाददपिदह्यते ॥ ५२ ॥ तावत्पापानिगर्जंतितावद्ब्रह्म
तिपातकी ॥ यावन्नविहितोभास्वान् दीपोनारायणगृहे ॥ ५३ ॥ दर्शनादपिदीपस्यसर्वसिद्धिर्नृणांभवेत् ॥ कामनायांसमुद्दिश्य
दीपंकारयतेहरेः ॥ ५४ ॥ सासासिध्यतिनिर्विघ्नास्कन्दसेऽनंतगुणोत्तरम् ॥ पंचायतनसंस्थेषुतथादेवेषुपंचसु ॥ ५५ ॥ विहितंदीप-
दानंचचातुर्मास्येमहाफलम् ॥ ५६ ॥ एकोविष्णुस्तुष्यतेमुक्तिदातानित्यंध्यातःपूजितःसंस्तुतश्च ॥ यस्याःश्रीस्तयश्चगेहेशंभवा
तत्तद्दृष्ट्यंमोक्षहेतानृपयः ॥ ५७ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येतपोधिकारषोडशोपचारदीप-
महिमावर्णनंनामसप्तमोऽध्यायः ७ ॥ ॥ ईश्वरउवाच ॥ ॥ हरेर्दीपस्यमहीपादधिकोयंप्रकुर्वते ॥ वैकुंठवासएवस्यान्ममेश्व
यमवाञ्छितम् ॥ १ ॥ ॥ कार्तिकेयउवाच ॥ ॥ दीपोऽयंविष्णुभक्तेनमन्त्रवद्विहितोनरैः ॥ सदाविशेषफलदोचातुर्मास्येऽधिकःक-
थम् ॥ २ ॥ ॥ ईश्वरउवाच ॥ ॥ विष्णुर्नित्याधिदैवंमेविष्णुःपूज्यःसदामम ॥ विष्णुर्मेनसदाध्यायेविष्णुभक्तःपरोहिसः ॥ ३ ॥
सविष्णुवल्लभोदीपःसर्वदापापहारकः ॥ चातुर्मास्येविशेषेणकामनासिद्धिकारकः ॥ ४ ॥ विष्णुर्दीपेनसंतुष्टोयथाभवतिपुत्रक
॥ तथायज्ञसहस्रैश्चवरैर्नैवप्रयच्छति ॥ ५ ॥ स्वल्पव्ययेनदीपस्यफलमानंतकंनृणाम् ॥ अनंतेशयनेप्राप्तेपुण्यसंख्यानविद्यते ८
॥ ६ ॥ तस्मात्सर्वात्मभावेनश्रद्धयासंयुतेनच ॥ दीपप्रदानंकुरुतेहरेःपापैर्नलिप्यते ॥ ७ ॥ उपचारैःषोडशकैर्यतिरूपेहरौपुनः ॥ दी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पत्रदानेविहितेसर्वंसुद्योतितंजगत् ॥ ८॥ ॥ब्रह्मोवाच॥ ॥दीपादनंतरंब्रह्मन्नन्नस्यचनिवेदनम् ॥त्रयोदश्यांभक्तियुक्तैः
कार्यमोक्षपदस्थितैः ॥ ९ ॥अमृतंसपरित्यज्ययदन्नंदेवताअपि ॥स्पृहयंतिगृहस्थस्यगृहद्वारगताःसदा ॥ १० ॥ हरेरन्नंविशे
षेणप्रदेयःप्रत्यहंनरैः ॥फलैरर्घःप्रदातव्यस्तत्कालसमुदाहृतैः ॥११॥ तांबूलवल्लीपत्रैश्चतदापूगफलैःशुभैः ॥ द्राक्षाजंबाम्रजंफ
लैरखोडदाडिमैरपि॥ १२ ॥बीजपूरफलैश्चैवदद्यादर्घ्यंसुभक्तितः॥ शरवतींयसमादायतस्योपरिफलंशुभम्॥ १३ ॥मंत्रेणानेनवि
प्रेंद्रकेशवायनिवेदयेत् ॥पुनराचमनंदेयमन्नदानादनंतरम् ॥ १४ ॥ आर्तिक्यंचततःकुर्यात्सर्वपापविनाशनम् ॥ चतुर्दश्यांपुनः
कार्यंयतयंसंप्रदीयते ॥ १५ ॥पंचदश्यांप्रणामःकार्यःसर्वदिक्षुद्विजैःसह ॥ सप्तसागरजेस्तीर्थेदत्तेयत्फलमाप्यते ॥ १६ ॥ तत्तांयदा
नाच्चहरेःप्राप्यतेविष्णुवल्लभैः ॥ चतुर्वारंनमोभिश्चजगत्सर्वंचराचरम् ॥१७ ॥ कांतंभवतिविप्राग्र्यतत्तीर्थगमनादिकम् ॥षोड
श्यादेवसायुज्यंचिंतयेद्यागविक्तमम् ॥ १८ ॥आत्मनश्चहरेर्नित्यंनमूर्तिंभावयेत्तदा ॥ मूर्तामूर्तस्वरूपत्वंहृश्यांभवतियोगवित्॥
१९ ॥ तस्मिन्दृष्टेनिवर्तेतसदसद्रूपजाक्रिया ॥आत्मानंतेजसांमध्येचिंतयेत्सूर्यवर्चसम् ॥ २० ॥अहमेवतदाविष्णुरित्यात्मनिविचा
रयन् ॥लभतेवैष्णवंदेहंजीवन्मुक्तोद्विजोभवेत् ॥ २१ ॥चातुर्मास्यविशेषेणयोगयुक्तोद्विजोभवेत् ॥ इयंभक्तिःसमादिष्टामोक्षमा
र्गप्रदाहरेः॥ २२ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येअष्टमोऽध्यायः ८ ॥ ॥ईश्वरउवाच॥ ॥एतत्ते
पूजनंविष्णोःषोडशोपायसंभवम् ॥कथितंयद्द्विजःकृत्वाप्राप्नोतिपरमंपदम् ॥ १ ॥यथाचक्षत्रियविशांकरणान्मुक्तिरुत्तमा ॥शू
द्राणांवाधिकारास्मिन्स्त्रीणांनैवकदाचन ॥ २॥ ॥कार्तिकेयउवाच॥ ॥शूद्राणांचतयास्त्रीणांधर्मंविस्तरतोवद॥ केनमुक्तिर्भवे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषां कृष्णस्याराधनं विना ॥ ३ ॥ ॥ईश्वर उवाच॥ ॥सच्छूद्रैरपि नो कार्यो वेदाक्षरविचारणा ॥ नश्रोतव्यं न पठ्यं च पठन्नरकभा
ग्भवेत् ॥ ४ ॥ पुराणानां न वै पाठः श्रवणं कारयेत्सदा ॥ स्मृत्युक्तकगुरोर्ग्राह्यं न पाठः श्रवणादिकम् ॥ ५ ॥ ॥स्कंद उवाच॥ ॥सच्छू
द्राः के समाख्यातास्ताश्च विस्तरतो वद ॥ के सन्तः के च शूद्राश्च सच्छूद्रा नाम तत्र के ॥ ६ ॥ धर्मोदा यस्य पत्नी स्यात्स सच्छूद्र उदाहृतः
॥ समानकुल्या योग्या रूपा दशदोषविवर्जिताः ॥ ७ ॥ उद्वाह्या वेदविधिना स सच्छूद्रः प्रकीर्तितः ॥ अक्लीबाऽव्यंगिनी शस्ता महारो-
गाद्यदूषिता ॥ ८ ॥ अनिंदिता शुभकला च क्षुरोगविवर्जिता ॥ बाधिर्यहीना चपला कन्या मधुरभाषिणी ॥ ९ ॥ दूषणैर्दशभि
र्हीना वेदोक्तविधिना नरैः ॥ विवाहिता च सा पत्नी गृहिणी यस्य सर्वदा ॥ १० ॥ सच्छूद्रः स वै विज्ञेयो देवादीनां विभागकृत् ॥
पुण्यकार्येषु सर्वेषु प्रथमं सा प्रकीर्तिता ॥ ११ ॥ तया स्वविहितो धर्मः संपूर्णफलदायकः ॥ चातुर्मास्ये विशेषेण तया सह गुणा
धिकः ॥ १२ ॥ भार्यारतिः शुचिर्भृत्यादीनां पोषणतत्परः ॥ श्राद्धादिकारको नित्यमिष्टापूर्तप्रसाधकः ॥ १३ ॥ नमस्कारादिमंत्रे
ण नाम संकीर्तनेन च ॥ देवास्तस्य च तुष्यंति पंचयज्ञादिकैः शुभैः ॥ १४ ॥ स्नाने च तर्पणे चैव वन्हिहोमोऽप्यमंत्रकः ॥ ब्रह्मयज्ञा
तिथेः पूजा पंचयज्ञान्न संत्यजेत् ॥ १५ ॥ कार्यः स्त्रीभिश्च शूद्रैश्च ब्रह्ममंत्रं पंचयज्ञकम् ॥ पंचयज्ञैश्च संतुष्टा यांति येषां पितृदेवताः ॥ १६ ॥
तथा पातिव्रत्याच्च पतिशुश्रूषया सदा ॥ पतिव्रताया देहे तु सर्वे देवाश्च संति हि ॥ १७ ॥ अतस्ताभ्यां समेताभ्यां धर्मादीनां समागमः
॥ यदोभयोर्मतिः पुष्टे संतुष्टाः पितृदेवताः ॥ १८ ॥ कार्यादीनां च सर्वेषां संगमस्तत्र नित्यदा ॥ चातुर्मास्ये समायाते विष्णुभक्त्या तयोः शि
वम् ॥ १९ ॥ समानजातिसंभूता पत्नी यस्य धृता भवेत् ॥ पूर्वो भर्त्ताऽर्द्धभागी स्यात् द्वितीयस्य न किंचन ॥ २० ॥ अर्थकार्याधिकारोऽस्या

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

धनधर्मार्द्धधारिणी ॥ स्वंस्वंकृतंसदैवस्यात्तयोः कर्मशुभाशुभम् ॥ २१ ॥ यानुगच्छतिभर्तारंमृतंसत्तपसाद्विज ॥ साध्वीसाहि
सधरिज्ञेयातयाचाद्ध्रियतेकुलम् ॥ २२ ॥ अन्यजातिमृतंचाथ धृतावापि विवाहिता ॥ वैश्वानरस्यमार्गेणसातमुद्धरतेपतिम्
॥ २३ ॥ यथाजलाच्चजंबालः कृष्यतेधार्मिकैर्नृभिः ॥ एवमुद्धरतेसाध्वीभर्तारंयाऽनुगच्छति ॥ २४ ॥ अन्यजातिसमुद्भूताअ
न्येनविधृतायदि ॥ तावुभौधर्मकार्येषुसंत्याज्यौनसदामतौ ॥ २५ ॥ स्वस्वकर्मप्रकुरुतःसत्कर्मजंस्वकंफलम् ॥ तस्माद्वरिष्ठा
हीनावासत्कुल्याशूद्रसंभवे ॥ २६ ॥ धृतानकार्यासापत्नीयत्करोतिनवर्धते ॥ तयासहकृतंपुण्यंवर्द्धतेदशधोत्तरम् ॥ २७ ॥ अनंतत्तु
सिदनैवतत्कृतैरपिवातथा ॥ क्रयक्रीताचयाकन्यादासीसापरिकीर्तिता ॥ २८ ॥ सच्छूद्रस्याधिकारसाकदाचिन्नैवजायते ॥ याकन्या
स्वयमुद्यम्यपित्रादत्तावरायच २९ विवाहविधिनोढापिनृदेवार्थसाधिनी ॥ सल्लक्षणाविनीतायाविवेकादिगुणाशक्ता ॥ ३० ॥ सच्च
रित्रापतिपरासातेभ्योदातुमर्हति ॥ विशुद्धकुलजाकन्याधर्मोढाधर्मचारिणी ॥ ३१ ॥ सापुनातिकुलसप्तमातृतःपितृतस्तथा ॥ ए
षएवमयाप्रोक्तःसच्छूद्राणांपरोविधिः ॥ अधोजातिसमुद्भूतासच्छूद्रात्क्रमहीनजा ॥ विवाहोदशधाप्रोक्तो दशधापुत्रताभवेत्तु ॥
३३ ॥ चत्वारउत्तमाप्रोक्ताविवाहामुनिसत्तम ॥ शेषाःसर्वप्रकीर्तितेषु कथिताश्चपुराविदैः ॥ ३४ ॥ प्राजापत्यस्तथाब्राह्मोदैवार्षश्चा
तिशोभनाः ॥ गांधर्वश्चासुरश्चैवराक्षसश्चपिशाचकः ॥ ३५ ॥ प्रातिभाघातिनश्चेतिविवाहाःकथितादश ॥ एतेहिहीनजातीनां
विवाहाःपरिकीर्तिताः ॥ ३ ॥ औरसःक्षेत्रजश्चैवदत्तःकृत्रिमएवच ॥ गूढोत्पन्नोपविद्धश्चकानीनश्चसहोढकः ॥ ३७ ॥ क्रीतःपौनर्भव
श्चापिपुत्रादशविधाःस्मृताः ॥ औरसादपिहीनाश्चतेपितॄणांशुभावहाः ॥ ३८ ॥ अष्टादशमितानांचानकृतीनांयथातथा ॥ विधिर्नैव-

CC-0. In Public Domain. Digitization by eGangotri

चा·मा· क्रियानैवस्मृतिमार्गेपिनैवच ॥ ३९ ॥ तासांब्राह्मणशुश्रूषाविष्णुध्यानंशिवार्चनम् ॥ अमंत्रात्पुण्यकरणंदानंदेयंचवैसदा ॥ ४० ॥ नदान मा·अ·
१० स्यसयालोकेश्रद्धयायत्प्रदीयते ॥ अश्रद्धयाऽर्चितयादानंवैरस्यकारणम् ॥ ४१ ॥ अहिंसादिःसमादिष्टोधर्मस्तासामहाफलः ॥ १९
चातुर्मास्यविशेषेणाविदेवेशादिसेवया ॥ ४२ ॥ सद्दर्शनैस्तथाधर्मःसेव्यतस्त्वाविरोधिभिः ॥ सच्छूद्रैर्दानपुण्यैश्चद्विजशुश्रूषणा
दिभिः ॥ ४३ ॥ वृत्तिश्चसत्यानृतजावाणिज्यव्यवहारजा ॥ अशीतिभागमादद्याद्व्याजाद्वार्धुषिकःशते ॥ ४४ ॥ सपादभागध्यातुसूर्येयो
दिषुगृह्यते ॥ एवंनवंधोभवतिपातकस्यकदाचन ॥ ४५ ॥ प्रातःकर्मस्करेशानंमध्यान्हेद्विजसेवनं ॥ अपराण्हेऽथकायोगिकुर्वन्मत्स्य
स्करवीभवेत् ॥ ४६ ॥ गृहस्थेश्चसदाभाव्यंयावज्जीवक्रियापरेः ॥ पंचयज्ञरतेश्चैवाऽतिथिद्विजस्कपूजकैः ॥ ४७ ॥ विष्णुभक्तिरते-
श्चैववेदमंत्रविपाठकेः ॥ सततंदानशीलैश्चदीनार्तजनवत्सलैः ॥ ४८ ॥ क्षमादिगुणसंयुक्तेर्द्वादशाक्षरपूजकैः ॥ षडक्षरमहोंकारपरमा
नंदपूरितैः ॥ ४९ ॥ सदपत्यैःसदाचारैःसताशुश्रूषणेरपि ॥ विमत्सरैःसदास्थेयंतापक्लेशविवर्जितैः ॥ ५० ॥ प्रव्रज्यावर्जनैरथसच्छूद्र
धर्मतर्जितैः ॥ तोषणंसर्वभूतानांकार्यंवित्तानुसारतः ॥ ५१ ॥ सदाविष्णुशिवादीनांयेभक्ताःस्तेनरानहि ॥ देववद्द्विधिद्व्यंतिचातु-
र्मास्यविशेषतः ॥ ५२ ॥ ॥ इतिश्रीस्कंदपुराणेईश्वरसनत्कुमारसंवादेचातुर्मास्यमाहात्म्येशूद्राधिकारसच्छूद्रकथननामनवमोऽ
ध्यायः ॥ ९ ॥ ॥ नारदउवाच ॥ ॥ अष्टादशप्रकृतयःकाबदस्वपितामह ॥ वृत्तिस्तासांचकाधर्मःसर्वविस्तरतोमम ॥ १ ॥ ॥ ब्र-
ह्मोवाच ॥ ॥ मज्जन्माभूद्भगवतोनाभिपंकजकोशतः ॥ स्वकालपरिमाणेनप्रबुद्धस्यजगत्पतेः ॥ २ ॥ ततोबहुतिथेकालेकेशवेनपुरा १०
स्मृतः ॥ स्रष्टुकामेनविविधाःप्रजामनसिराजसीः ॥ ३ ॥ अहंकमलजस्तत्रजातःपुत्रश्चतुर्मुखः ॥ उदरंनाभिनालेनप्रविश्याऽथव्यलो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कथं ॥४॥ तत्रब्रह्मांडकोटीनांदर्शनंमेऽभवन्मुने ॥ विस्मयाच्चिंतयानस्यसृष्ट्यर्थमभिधावतः ॥ ५ ॥ निर्गम्यपुनरेवाहंपद्मनालेन
यावता॥ बहिरागोविस्मृतंतत्सर्वंसृष्ट्यर्थकारणम् ॥ ६॥ पुनरेवततोगत्वाप्रजाःसृष्ट्वाचतुर्विधाः ॥ नाभिनालेननिर्गत्यविस्मृतेनांतरा
त्मना ॥ ७॥ तदाहंजडवज्जातोवायुवाचाशरीरिणी ॥ तपस्तपमहाबुद्धेजडत्वंनोचितंतव॥ ८ ॥ दशवर्षसहस्राणिततोऽहंतपआस्थि
तः ॥ पुनराकाशजावाणीमामुवाचाऽविनश्वरा॥ ९ ॥ वेदरूपाश्रितापूर्वमाविर्भूतातपोबलात्॥ ततोभगवतादिष्टःसृजत्वंबहुधाःप्रजाः
॥ १०॥ राजसंगुणमाश्रित्यभूतसर्गमकल्पयत् ॥ मनसामानसीसृष्टिःप्रथमंचिंतितामया ॥ ११ ॥ ततोवैब्राह्मणाजातामरीच्यादिमु
नीश्वराः ॥ तेषांकनीयांस्त्वंजातोज्ञानवेदांतपारगः ॥ १२ ॥ कर्मनिष्ठाश्चतेनित्यंसृष्ट्यर्थंसुततोद्यताः ॥ निर्व्यापारोविष्णुभक्तएकांतब्र
ह्मसेवकः ॥ १३ ॥ निर्ममोनिरहंकारोममत्वमानसःकृतः ॥ क्रमान्मयातुतेषांवैवेदरक्षार्थमेवच॥ १४ ॥ प्रथमामानसीसृष्टिर्द्विजात्या-
दिविनिर्मिता ॥ ततोऽहंमांगिकींसृष्टिंसृष्टवांस्तत्रनारद ॥ १५ ॥ मुखाच्चब्राह्मणाजाताबाहुभ्यःक्षत्रियास्मम॥ वैश्याऊरुसमुद्भूताःप-
द्भ्यांशूद्राबभूविरे ॥ १६ ॥ अनुलोमविलोमाभ्यांकेषांचित्क्रमयोगतः ॥ शूद्रादधोधोजाताश्चसर्वेपादतलोद्भवाः ॥ १७ ॥ ताःसर्वास्तत्प्र
कृतयोममदेहांशसंभवाः ॥ नारदत्वंविजानीहितासांनामानिवच्मिते ॥ १८ ॥ ब्राह्मणःक्षत्रियोवैश्यस्त्रयएवद्विजातयः॥ वेदास्तपोऽध्य
यनंचयजनंदानमेवच ॥ १९ ॥ वृत्तिरध्यापनाच्चैवतथास्वल्पप्रतिग्रहात् ॥ विप्रःसमर्थस्तपसायद्यपिस्यात्प्रतिग्रहे ॥ २० ॥ तथापिनै
वगृह्णीयात्तपोरक्षार्थतःसदा॥ वेदपाठोविष्णुपूजाब्रह्मध्यानमलोभता॥ २१ ॥ अक्रोधतानिर्मलत्वंक्षमासारत्वमार्यता ॥ क्रिया
तत्परतादानक्रियासत्यादिभिर्गुणैः ॥ २२ ॥ भूषितोयोभवेन्नित्यंसविप्रइतिकथ्यते ॥ क्षत्रियेणतपःकार्यंयजनंदानमेवच ॥ २३ ॥ व

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दपाठो विप्रभक्तिरेषांशस्त्रेणजीवनं ॥ स्त्रीबालगोब्राह्मणार्थेभूम्यर्थेस्वामिसंकटे ॥ २४ ॥ संप्राप्तेशरणेचैवपीडितानांचशुद्धि
ते ॥ आर्तत्राणपरायचक्षात्रियाब्रह्मणाकृताः ॥ २५ ॥ धनवृद्धिकरोवैश्यः पशुपालीकृषीवलः ॥ रसादीनांचाविक्रेतादेवब्राह्मण
पूजकाः ॥ २६ ॥ अर्थवृद्धिकरोव्याजाद्यज्ञकर्मादिकारकः ॥ दानमध्ययनंचैतिवैश्यवृत्तिरुदाहृता ॥ २७ ॥ एतान्यवद्यमंत्राणिशू
द्रः कारयतेसदा ॥ नित्यषट्दैवतश्राद्धहंतकाराग्नितर्पणं ॥ २८ ॥ देवद्विजातिभक्तिश्चनमस्कारेणसिद्ध्यति ॥ शूद्राःप्रभातरुत्था
यकलापादाभिवंदनम् ॥ २९ ॥ विष्णुभक्तिमयान्श्लोकान्पठन्विष्णुत्वमाप्नुयात् ॥ वार्षिकव्रतकृन्नित्यंतिथिवारादिदैवतः ॥ ३०
॥ अन्नदः सर्वजीवानांगृहस्थः शूद्रईरितः ॥ अमंत्राण्यपिकर्माणिकुर्वन्नेवहिमुच्यते ॥ ३१ ॥ चातुर्मास्यव्रतकरः शूद्रोपिहरिता
व्रजेत् ॥ शिल्पीचनर्तकश्चैवकाष्ठकारः प्रजापतिः ॥ ३२ ॥ धर्मकारश्चित्रकश्चैवसूत्रकारजकस्तथा ॥ गच्छकुस्तुकारश्चचक्रिक
श्चर्मकारकः ॥ ३३ ॥ सूनिकोध्वनिकश्चैवकोल्हिकोमत्स्यघातकः ॥ औनामिकस्तुचांडालः प्रकृत्यष्टादशैवताः ॥ ३४ ॥ शिल्पि
नस्वर्णकारश्चदारुकः कांस्यकारकः ॥ काण्डकः कुंभकारश्चप्रकृत्याउत्तमाश्चषट् ॥ ३५ ॥ रथवाद्युष्ट्रवाहोचहयवाहीतथैवचगोपालश्च
शकारोअधमाधमपंचकम् ॥ ३६ ॥ रजकश्चर्मकारश्चनटोबुरुडएवच ॥ कैवर्तमेदभिल्लाश्चसप्तैतेअंत्यजाःस्मृताः ॥ ३७ ॥ योय-
स्यहीनोवर्णनस्यचाष्टादशमोनरः ॥ सर्वासांप्रकृतीनांचउत्तमामध्यमाःसमाः ॥ ३८ ॥ भेदास्त्रयःसमाख्याताविज्ञेयाःस्मृतिनि
र्णयात् ॥ शिल्पिनःसप्तविज्ञेयाउत्तमाःसमुदाहृताः ॥ ३९ ॥ स्वर्णकृत्कंचुकश्चैवतंदुलीपुष्पलावकः ॥ तांबूलीनापिकश्चैवमणिका ११
श्चसप्तधा ॥ ४० ॥ नस्नानंदेवताहोमस्तपोनियमएवच ॥ नस्वाध्यायवषट्कारौनचशुद्धिर्विवाहिता ॥ ४१ ॥ एतासांप्रकृतीनांचतु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रुपूजासदोदिता ॥ विप्राणांशक्तितोनित्यंदानमेवपरोविधिः ॥ ५२ ॥ सर्वेषामेववर्णानांसाश्रमाणांमहामुने ॥ सर्वासांप्रकृ
तीनांचविष्णुभक्तिःसदाशुभा ॥ ५३ ॥ इतितेकथितंसर्वंयथाप्रकृतिसम्भवम् ॥ कथांशृणुमहापुण्यांशूद्रःशुद्धिमगाद्यया ॥
५४ ॥ इदंपुराणंपरमंपवित्रंविशुद्धधीर्यस्तुशृणोतिवापठेत् ॥ विधूयपापानिपुरार्जितानिसयातिविष्णोर्भवनंक्रियापरः ॥
॥ ४५ ॥ ॥ इतिश्रीस्कन्दपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येप्रकृतिकथनंनामदशमोऽध्यायः ॥ १० ॥ ॥ ब्रह्मो
वाच ॥ ॥ शूद्रःपैजवनोनामगार्हस्थ्याच्छुद्धिमाप्तवान् ॥ धर्ममार्गाविरोधेनतन्निबोधमहामते ॥ १ ॥ आसीत्पैजवनःशूद्रः
पुरात्रेतायुगेकिल ॥ सधर्मनिरतःख्यातोविष्णुब्राह्मणपूजकः ॥ २ ॥ न्यायागतधनोनित्यंशान्तःसर्वजनप्रियः ॥ सत्यवादी
विवेकज्ञस्तस्यभार्याचसुन्दरी ॥ ३ ॥ धर्माढ्यावेदविधिनासमानकुलजाशुभा ॥ पतिव्रतामहाभागादेवद्विजहितरता ॥ ४ ॥-
काश्यांसवर्धिताबालावैजयन्तीविवाहिता ॥ साधर्माचरणेदक्षावैष्णवव्रतचारिणी ॥ ५ ॥ भर्त्रासहतयासम्यक्चिक्रीडेस्म-
विनीतवत् ॥ सोपिरेमेतयाकालंहस्तिन्येवमहागजः ॥ ६ ॥ अर्थाप्तिःपूर्वपुण्येनजातातस्यमहात्मनः ॥ वाणिज्यात्स्वजनैर्नित्यंस्व
देशपरदेशजम् ॥ ७ ॥ कारयत्यर्थजातंचपरकीयस्वकीयजैः ॥ एवमर्थश्चबहुधासञ्जाताधर्मदर्शनः ॥ ८ ॥ पुत्रद्वयंचसञ्जातंपि
तुःशुश्रूषणेरतम् ॥ तस्यपुत्राःपितुर्भक्ताद्रव्याद्दिमदवर्जिताः ॥ ९ ॥ पितृवाक्यरताःश्रेष्ठाःस्वधर्माचारशोभनाः ॥ पित्रोःशु-
श्रूषणादन्यन्नाभिनन्दन्तिकिञ्चन ॥ १० ॥ तेसम्बद्धाःसुसम्बन्धाःपित्राधर्मार्थदर्शिना ॥ तस्यान्योमातृपितृचाकारयत्स्वनिवारित
म् ॥ ११ ॥ ऋद्धिमद्भवनंतस्यधनधान्यसमन्वितम् ॥ सापिधर्मरतानित्यंदेवतातिथिपूजका ॥ १२ ॥ गृहागतानांविमुखोयस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चा०मा जातुकदाचन ॥ शीतकाले धनं प्रादादुष्णकाले जलान्नदः ॥ १३ ॥ वर्षाकाले वस्त्रदश्च बभूवान्नप्रदः सदा ॥ वापीकूपतडा- मा०अ०
१२ गादिप्रपादेवगृहाणि च ॥ १४ ॥ कारयत्स चितेकाले शिवविष्णुव्रतस्थितः ॥ इष्टधर्मः स्ववर्णानां समाचीर्णो महाफलैः ॥ १५ ११
॥ अन्येषां पूर्वधर्माणां तेषां पूतकरः सदा ॥ सर्वभूवधनाढ्योऽपि व्यसनैर्न समाश्रितः ॥ १६ ॥ विष्णुभक्तिरतो नित्यं चातुर्मास्ये
विशेषतः ॥ एकदा गालवमुनिः शिष्यैर्बहुभिरावृतः ॥ १७ ॥ ब्रह्मज्ञानरतः शान्तस्तपोनिष्ठो महावशी ॥ अभ्याजगाम शूद्रस्य गेह
पैजवनस्य सः ॥ १८ ॥ सर्वाग्निमधुभिस्तस्य अभ्युत्थानासनादिभिः ॥ उपचारैर्मुदायुक्तः कृतार्थ इव मानयन् ॥ १९ ॥ अद्य मे स
फलं जन्म जातं जीवितमुत्तमम् ॥ अद्य मे सफलो धर्मः कुशलश्चोद्धृतस्त्वया ॥ २० ॥ मम पापसहस्राणि दृष्ट्या दग्धानि ते मुने ॥ गृह
मम गृहस्थस्य सकलं पावितं त्वया ॥ २१ ॥ तस्य भक्त्या प्रसन्नो भूत् कृतमार्गपरिश्रमः ॥ उवाच मुनिशार्दूलः सच्छूद्रं तं कृताञ्जलिम् ॥
२२ ॥ कच्चित्ते कुशलं सौम्य मनो धर्मे प्रवर्तते ॥ अर्थानुबद्धाः सततं बन्धुदारसुतादयः ॥ २३ ॥ गोविन्दे सततं भक्तिर्दानदस्त्वं प्रवर्तसे ॥
धर्मार्थकामकार्येषु समभाव मनस्तव ॥ २४ ॥ विष्णुपादोदकं नित्यं शिरसा धारयिष्यसि ॥ पादोद्भवं च गंगोदं द्वादशाब्दफलप्रदम् ॥
२५ ॥ चातुर्मास्ये विशेषेण तत्फलं द्विगुणं भवेत् ॥ हरिभक्तिर्हरिकथा हरिस्तोत्रं हरेर्नतिः ॥ २६ ॥ हरिध्यानं हरेः पूजा सुकृते देवचमो-
क्षकृत् ॥ एवं ब्रुवाणं स मुनिं पुनराह गतिं गतः ॥ २७ ॥ भवद्दृष्ट्या समफलमेतज्जातं न संशयः ॥ तथापि श्रोतुमिच्छामि तव वाणीं मनोमयीं
॥ २८ ॥ भवादृशानागमनं सर्वार्थेषु प्रकल्प्यते ॥ ततस्तौ स मुदा युक्तौ संजातो हृष्टचेतसौ ॥ २९ ॥ मुनिं पैजवन नाम सच्छूद्रः प्राह संभ- १२
तः ॥ किमागमनकृत्यं ते कथयस्व प्रसादतः ॥ ३० ॥ को वा तीर्थप्रसंगश्च चातुर्मास्ये समीपगे ॥ गालवः प्राह सच्छूद्रं धार्मिकं सत्यवा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दिनम् ॥ ३१ ॥ मर्मतीर्थावसिक्तस्यमासा बहूनरागताः ॥ इदानीमाश्रमंयास्येचातुर्मास्येसमागते ॥ ३२ ॥ आषाढशुक्लैकादश्यां
करिष्येनियमंगृहे ॥ नारायणस्यप्रीत्यर्थंश्रेयोर्थंचात्मनस्तथा ॥ ३३ ॥ मत्तुवाच्यमुनिर्धर्मान्विनयानतकंधरम् ॥ ॥पैजवनउवाच
॥ ॥ मामनुग्रहजांबुद्धिंकुरुष्वद्विजपुंगव ॥ वेदेधिकारोनैवास्तिवदसारंजपस्यवा ॥ ३४ ॥ पुराणस्मृतिपाठस्यतस्मात्किंचिदिदंस्व
मे ॥ तत्वात्मसदृशंकिंचिज्ज्ञातिरूपंमहाफलम् ॥ चातुर्मास्यविशेषेणमुक्तिसंसाधकंवद ॥ ३५ ॥ ॥गालवउवाच ॥ ॥शालग्रा
मेगतंविष्णुंचक्रांकितपुटंसदा येर्चयंतिनरानित्यंतेषांभक्तिःस्वदूरतः ॥ ३६ ॥ शालग्रामेमनोयस्ययत्किंचित्क्रियतेशुभम् ॥ अ
क्षय्यंतद्भवेन्नित्यंचातुर्मास्येविशेषतः ॥ ३७ ॥ शालग्रामशिलायत्रयत्रद्वारावतीशिला ॥ उभयोःसंगमःप्राप्तोमुक्तिस्तस्यनदुर्लभा
॥ ३८ ॥ शालग्रामशिलायस्यापूर्वमासंपूज्यतेनृभिः ॥ पंचक्रोशंपुनात्येषाअपिपापशतान्वितैः ॥ ४० ॥ तेजसंपिंडमेतद्धिब्रह्मरूप
मिदंशुभम् ॥ यस्याःसंदर्शनादेवसद्यःकल्मषनाशनम् ॥ ४० ॥ सर्वतीर्थानिपुण्यानिदेवतायतनानिच ॥ नद्यःसर्वामहापुण्य
तीर्थत्वंप्राप्नुवंतिहि ॥ ४१ ॥ सान्निधानेनवैतस्याःक्रियाःसर्वत्रशोभनाः ॥ अज्ञातिहिक्रियोत्थंचचातुर्मास्येविशेषतः ॥ ४२ ॥ पू-
ज्यतेभवनेयस्यशालग्रामशिलाशुभा ॥ कोमलैस्तुलसीपत्रैर्विमुखस्तत्रवैयमः ॥ ४३ ॥ ब्राह्मणक्षत्रियविशांसच्छूद्राणाम
थापिवा ॥ शालग्रामाधिकारोस्तिनचान्येषांकदाचन ॥ ४४ ॥ ॥सच्छूद्रउवाच ॥ ॥ब्रह्मन्वेदविदांश्रेष्ठसर्वशास्त्रविशारद ॥
स्त्रीशूद्रादिनिषेधःशालग्रामेहिश्रूयते ॥ ४५ ॥ मादृशानांत्वेकंप्रशालग्रामपूजाविधिंवद ॥ ४६ ॥ ॥गालवउवाच ॥ ॥अ
सच्छूद्रगतंदासनिषेधंविद्धिमानद ॥ स्त्रीणामपिचसाध्वीनांनैवाभावःप्रकीर्तितः ॥ ४७ ॥ माभूत्संशयस्तेनात्रनामुष्यसंशयास्त

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चा॰मा॰ १३ लम् ॥ शालग्रामार्चनपराः शुद्धदेहाविवेकिनः ॥ ४८ ॥ नतेयमपुरंयान्तिचातुर्मास्येपिपूजकाः ॥ शालिग्रामार्पितंमाल्यंशिरसा मा॰अ॰ ११
धारयंतिये ॥ ४९ ॥ तेषांपापसहस्राणिविलयंयान्तितत्क्षणात् ॥ शालिग्रामशिलाग्रेतुयःप्रयच्छतिदीपकम् ॥ ५० ॥ तेषांसौरपुर-
वासः कदाचिन्नैवहीयते ॥ शालग्रामगतंविष्णुंकुसुमैर्मनोभिर्मनोहरैः ॥ येऽर्चयंतिमहाशूद्रस्कंदेवहरौतुयः ॥ ५१ ॥ पंचा
मृतेनस्नपनंयेकुर्वंतिसदानराः ॥ शालग्रामशिलायांचनतेसंसारिणोनराः ॥ ५२ ॥ मुक्तोनिंदानममलंशालग्रामगतंहरिं ॥ हृदिन्यस्य
सदाभक्त्यायोध्यायतिमुक्तिभाक् ॥ ५३ ॥ तुलसीदलजांमालांशालिग्रामोपरिन्यसेत् ॥ चातुर्मास्येविशेषेणसर्वकामानवाप्नुयात्
॥ ५४ ॥ नतावत्पुष्पजामालाशालग्रामस्यवल्लभा ॥ सर्वदातुलसीदेवीविष्णोर्नित्यंशुभप्रिया ॥ ५५ ॥ तुलसीवल्लभानित्यंचातुर्मास्ये
विशेषतः ॥ शालिग्रामोमहाविष्णुस्तुलसीश्रीर्नसंशयः ॥ ५६ ॥ अतोधासितपानीयैःस्नाप्यचंदनचर्चितैः । ॥ मंजरीभिस्तुतदेवंशाल
ग्रामशिलाहरिम् ॥ ५७ ॥ तुलसीसंभवाभिश्चकृत्वाकामानवाप्नुयात् ॥ पत्रेतुप्रथमंब्रह्माद्वितीयेभगवान्शिवः ॥ ५८ ॥ मंजर्यांभग-
वान्विष्णुस्तदेकस्थस्तथातदा ॥ मंजरीदलसंयुक्ताग्राह्याबुधजनैःसदा ५९ तांनिवेद्यहरौभक्त्याजन्मादिक्षयकारणम् ॥ शालग्रामे
धूपराशिंनिवेद्यहरितत्परः ॥ ६० ॥ चातुर्मास्येविशेषेणमनुष्योनैवनारकी ॥ शालग्रामजनोदृष्ट्वापूजितःकुसुमैःशुभैः ॥ ६१ ॥ सर्व-
पापविशुद्धात्मायातितन्मयतांहरौ ॥ यस्तोयस्थगतंविष्णुंगंडकीजलसंभवम् ॥ ६३ ॥ श्रुतिस्मृतिपुराणेश्चसोपिविष्णुपदंव्रजेत्
॥ शालिग्रामशिलायाश्चचतुर्विंशतिसंख्यकाः ॥ भेदाःसंतिमहाशक्तान्शृणुष्वमहामते ॥ ६४ ॥ इमाद्वादश्यालोकेचचतुर्विं- १३
शतिसंख्यकाः ॥ तासांचदैवतंविष्णुंनामानितेवदाम्यहम् ॥ ६५ ॥ सएवमूर्त्तयश्चतुरुत्तराभिर्विंशद्भिरेकोभगवान्व्ययात्मः ॥

CC-0. In Public Domain. Digitization by eGangotri

सएषसंवत्सरनामसंज्ञः सएवग्रावागतआदिदेवः ॥ ६६ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्ये
पैजवनोपाख्यानेनामएकादशोऽध्यायः ॥ ११ ॥ ॥ पैजवनउवाच ॥ ॥ एतान्भेदान्ममब्रूहिविस्तारेणतपोधन ॥ त्वद्वाक्यामृ-
तपानेनतृषानैवप्रशाम्यति ॥ १ ॥ ॥ गालवउवाच ॥ ॥ शृणुविस्तारतोभेदान्पुराणोक्तान्वदामिते ॥ यान्छ्रुत्वामुच्यतेऽवश्यमनुजः
सर्वकिल्बिषात् ॥ २ ॥ पूर्वंतुकेशवःपूज्योद्वितीयमधुसूदनः ॥ संकर्षणस्तृतीयस्तुततोदामोदरःस्मृतः ॥ पंचमोवासुदेवाख्यःषष्ठः
प्रद्युम्नसंज्ञकः ॥ सप्तमोविष्णुरुक्तश्चाष्टमोमाधवएवच ॥ ४ ॥ नवमोनंतमूर्तिश्चदशमःपुरुषोत्तमः ॥ अधोक्षज स्ततःपश्चाद्द्वा
दशस्तुजनार्दनः ॥ ५ ॥ त्रयोदशश्चगोविंदश्चतुर्दशस्त्रिविक्रमः ॥ श्रीधरःपंचदशोहृषीकेशस्तुषोडशः ॥ ६ ॥ नृसिंहस्तुसप्तद-
शोविश्वयोनि स्ततःपरम् ॥ वामनश्चततःप्रोक्तस्ततोनारायणःस्मृतः ॥ ७ ॥ पुंडरीकाक्षइत्युक्तस्तस्यपद्मश्चततःपरम् ॥ हरिस्त्वयो
विंशतिमःकृष्णश्चांऽत्यउदाहृतः ॥ ८ ॥ शालग्रामस्यभेदास्तेमयोक्तास्तवशूद्रज ॥ मूर्तिभेदास्तथाप्रोक्ताएतएवमहाधनम् ॥ ९
॥ मूर्तयस्तिथिनामास्युरेकादश्यःसदैवहि ॥ संवत्सरेणपूज्यंतेचतुर्विंशतिमूर्तयः ॥ १० ॥ देवाश्चतराश्चतथाचतुर्विंशतिसंख्यकाः ॥
मासोमार्गशिराद्याश्चमासार्धाःपक्षसंज्ञकाः ॥ ११ ॥ अर्धांशसहितान्नित्यंपूजयन्भक्तिभाग्भवेत् ॥ चतुर्विंशतिसंज्ञंचचतुष्टय
मुदाहृतम् ॥ १२ ॥ एतच्चतुष्टयंनृणांधर्मकामार्थमोक्षदम् ॥ यःशृणोतिनरोभक्त्यापठेद्वापिसमाहितः ॥ १३ ॥ भूतसर्गस्यगोप्ता
सोहरिस्तस्यप्रसीदति ॥ १४ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येमूर्त्युत्पत्तिर्नामद्वादशोऽध्यायः
॥ १२ ॥ ॥ पैजवनउवाच ॥ ॥ शालग्रामशिलायांचजगदादिःसनातनः ॥ कथंपाषाणतांप्राप्तोगंडक्यांतन्ममेवद ॥ १ ॥ तस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 सादेनविप्रर्षेर्हरौभक्तिर्दृढाभवेत् ॥ भवंतस्तीर्थरूपाहिदर्शनात्पापहारिणः ॥ २ ॥ तीर्थामृतावगाहेनयथापावित्रतांनृ
 णां॥ भवद्वाक्यामृताज्ज्जातातथामेमनसंशयः ॥ ३ ॥ ॥गालवउवाच॥ ॥इतिहासमिमंपुण्यंपुराणोपुच्चेपक्ष्यते ॥यथासएव
भगवान्शालग्राममुपागतः ॥ ४ ॥ महेश्वरस्यलिंगत्वंकथयेहंतवानघ ॥ पूर्वंप्रजापतिर्दक्षोब्रह्मणोगुष्टसंभवः ॥ ५ ॥तस्यासी
दुहितासाध्वीसतीनाम्नीसुलक्षणा ॥ हरेणोढाविधिज्ञेन वेदोक्तविधिनाततः ॥ ६ ॥सचकारमहायज्ञंहरद्वेषाधिमूढधीः ॥ तेनदे
षेणमहतासतीप्रकुपिताभृशं ॥ ७ ॥यज्ञवेद्यांसमागम्यवन्हिधारणयातदा ॥ प्राणायामपराभूत्वादेहोत्सर्गंचकारसा ॥ ८ ॥पितृभा
ग्यंपरित्यज्यस्वभागंनहतासती ॥मनसाध्यानमगमत्तुशीतलंचाहिमालयम् ॥ ९ ॥यत्रयत्रमनोयातितत्स्वकर्मवशंगमृतौ॥ अवतीर्यस्त
त्रतत्रजायतेनात्रसंशयः ॥ १० ॥दह्यमानाहिसादेवीहिमालयसुताभवत् ॥ तत्रसापार्वतीभूत्वातपउग्रासमाश्रिता ॥ ११ ॥शि
वभक्तिरतानित्यंहरव्रतपरायणा ॥ शृंगेहिमवतःपुत्रीमनोन्यस्यमहेश्वरे ॥ १२ ॥ ततोवर्षसहस्रांतेभगवान्भूतभावनः ॥अथा
जगामतद्देशंविप्ररूपोमहेश्वरः ॥ १३ ॥तांज्ञात्वातपसाशुद्धांकर्मभावैःपरीक्षितैः॥ ततोदिव्यवपुर्भूत्वाकरेजग्राहपार्वतीम् ॥ १४
॥ तपसानिर्जितश्चाहंस्मिकरवाणिचकिंप्रियम् ॥ ततःप्राहमहेशानंप्रमाणंमेपिताकुरु ॥ १५ ॥ सप्तर्षीन्सत्वरान्तस्मैप्रेषयामास-
शंकरः ॥ तेतत्रगत्वासम्पूर्यवक्तुंहिमवतासह ॥ १६ ॥ निवेद्यचमहेशानप्रेषितामुनयोययुः ॥ ततोलग्नदिनेदेवामहेन्द्रादयईश्वर
म् ॥ १७ ॥ ब्रह्माविष्णुपुरोगाश्चपुरोधायाग्निकोययुः ॥ योगसिद्धाःसमायातंवरवेषंवृषध्वजम् ॥ १८ ॥ हिमवान्पूजयामासमधु
पर्कादिकैःशुभैः ॥उपचारैर्मुदायुक्तोमानयन्कृतकृत्यताम् ॥ १९ ॥ वेदोक्तेनविधानेनतांकन्यांसमयोजयत् ॥पाणिग्रहेणविधि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नाद्द्विजातिगणसंवृतः ॥ २० ॥ वह्निं प्रदक्षिणीकृत्य गिरीशस्तदनंतरम् ॥ दानकाले च गोत्रादि पृच्छोलज्जापरो हरः ॥ २१ ॥ ब्रह्म
णो वचनात्तेन विधिशेषो विशेषितः ॥ चरुप्राशनकाले तु पञ्चवक्त्रविकाशकृत् ॥ २२ ॥ सहितः सकलैर्देवैः कुतूहलपरायणैः ॥ गिरिजा
र्थं समायुक्तो वरः सोपि महेश्वरः ॥ २३ ॥ नवकोटिसुरवान्दृष्ट्वा साट्टहासो जनोऽभवत् ॥ वैदिकी श्रुतिरित्युक्त्वा शिवत्वं स्थिरतां व्रज ॥
२४ ॥ लज्जिता सा परित्यागं न करोसि च जन्मसु ॥ भर्तारमसितापांगी हरमेवाभ्यगच्छत ॥ २५ ॥ देवानां पूर्वतान्नांच प्रत्यक्षं सकलं कुले
॥ ततो विवाहे संपूर्णे हरो गात्कौतुकोकासि ॥ २६ ॥ गणानां चापि सांनिध्ये नामषयसदाधिकाम् ॥ पारिबाह ततो दत्वा शैलेन संवि
सर्जितः ॥ २७ ॥ मानितः सत्कृतश्चापि मंदरालयमभ्यगात् ॥ विश्वकर्मा ततस्तस्य क्षणेन मणिमद्गृहम् ॥ २८ ॥ निर्ममे देवदेवस्य
स्वेच्छावाह्निष्णुसुंदरम् ॥ सर्वर्द्धिमत्प्रशस्ताभं मणिविद्रुमभूषितम् ॥ २९ ॥ स्थूणासहस्रसंयुक्तं मणिवेदिमनोहरम् ॥ गणानंदि
प्रभृतयो यस्य द्वारि समाश्रिताः ॥ ३० ॥ त्रिनेत्राः शूलहस्ताश्च बभ्रुः शंकररूपिणः ॥ वाटिका अस्य परितः पारिजाताः सहस्रशः ॥
३१ ॥ कामधेनुर्मणिर्दिव्यो यस्य द्वारि समाश्रितौ ॥ तस्मिन्मनोहरतरे कामवृद्धिकरे गृहे ॥ ३२ ॥ वसतः पार्वतीसार्धं कामो दृष्टिपथं
ययौ ॥ वायुरूपः शिवं दृष्ट्वा कामः प्रोवाच शंकरं ॥ ३३ ॥ नमस्ते सर्वरूपाय नमस्ते वृषभध्वज ॥ नमस्ते गणनाथाय पाहि नाथ नमोस्तु
ते ॥ ३४ ॥ त्वया विरहितं लोके शैववस्तु शतमहीं ॥ न त्वया रहितं किंचि दृश्यते सचराचरे ॥ ३५ ॥ त्वं गोप्ता त्वं विधाता च लोकसंहा
रकारकः ॥ कृपां कुरु महादेव देहदानं प्रयच्छ मे ॥ ३६ ॥ ॥ ईश्वर उवाच ॥ ॥ यन्मया त्रिपुरादग्धः पर्वते पुरतोऽनघ ॥ तस्या एव स
मीपे त्वं पुनर्देहस्य देहवान् ॥ ३७ ॥ एवमुक्तस्ततः कामः स्वशरीरमुपागतः ॥ ववंदे चरणौ शूद्र विनयावनतोऽभवत् ॥ ३८ ॥ ततो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ननामचरणौपार्वत्यासंप्रहृष्टवान् ॥लब्धप्रसादस्ततयोःसमीपाद्भुवनत्रये॥३९॥चचारसमहातेजामहामोहबलान्वितः॥
पुष्पधन्वापुष्पबाणस्त्वाकुंचितशिरोरुहः॥४०॥सदाघूर्णितनेत्रस्यतपोदेहमुपाविशत्॥दिव्यासवैर्दिव्यगंधैर्वस्त्रमाल्यादिभि
स्तथा॥४१॥सख्यसंभोगसमयपरिचक्रुःसमंततः॥एवंप्रक्रीडतस्तस्यवत्सराणांशतंययौ॥४२॥साक्षैकानिशायद्वन्मैथुनसक्त
चेतसः॥एतस्मिन्नंतरेदेवास्तारकप्रद्रुताभयात्॥४३॥ब्रह्माणंशरणंजग्मुःस्कल्वातशरणगताः॥ ॥देवाऊचुः॥ ॥ता
रकोसौमहारौद्रस्त्वयादत्तवरःपुरा॥४४॥विजित्यतरसाशक्रंभुंक्तेत्रैलोक्यपूजितः॥वधोऽपायोयथातस्यजायतेसकुरुस्व-
यम्॥४५॥ ॥ब्रह्मोवाच॥ ॥मयादत्तवरश्चासौमयैवाच्छिद्यतमही॥स्वयंसंवर्ध्यकंडुकंछेत्तुकोऽपिनचार्हति॥४६॥त
स्मात्तस्यवधोपायंकथयामिमहात्मनः॥पार्वत्यांयोमहेशानात्सूनुरुत्पद्यतेहिसः॥४७॥दिनसप्तचतुष्कंत्वातारकंसहनि
ष्यति॥इतिवाक्यंतुतेश्रुत्वामंदरंलोकसुंदरम्॥४८॥ब्रह्मलोकात्समाजग्मुःपीडितादैत्यदानवैः॥तत्रनंदीप्रभृतयोगणाःशू
लभृतःपुरः॥४९॥गृहद्वाराद्व्युपावृत्यतस्थुःसंयुतचेतसः॥५०॥ ॥देवाऊचुः॥ ॥देवाश्चदुःखातुरचेतसोभृशंहतप्रज्ञा-
स्त्यक्तगृहाश्रयाखिलाः॥समाप्यमासांश्चतुरस्तपःस्थितादेवप्रसक्तहरतोषणपरम्॥५१॥ ॥इतिश्रीस्कंदपुराणेब्र
ह्मनारदसंवादेचातुर्मास्यमाहात्म्येपंजवनोपाख्यानेत्रयोदशोऽध्यायः॥१३॥ ॥गालवउवाच॥ ॥शक्रादयस्तुदेवेशा
दुःखसंतप्तमानसाः॥ईश्वरादर्शनभ्रांतमनःक्लेशाद्रियारतिम्॥१॥नमाप्तुलोकनायतेकृत्वायःप्रतिमाकृतिं॥तपसाराधया १५
मासुःसर्वभूतहृदिस्थितम्॥२॥कपर्दशिरसंदेवंशूलहस्तंपिनाकिनम्॥कपालखट्वांगधरंदशहस्तंकिरीटिनम्॥३॥उमा

CC-0. In Public Domain. Digitization by eGangotri

सहितमीशानं पंचवक्त्रं महाभुजम् ॥ कर्पूरगौरदेहाभं सितभूतिविभूषितम् ॥ ४ ॥ नागयज्ञोपवीतेन गजचर्मसमन्वितम् ॥ कृ
ष्णसारत्वचा चापि कृतप्रावरणं विभुं ॥ ५ ॥ कृतध्यानाः स्कन्दास्तत्र वृक्षाधारे समाश्रिताः ॥ व्रतचर्यां समाश्रित्य प्रचक्रुस्तपउत्त
मम् ॥ ६ ॥ षडक्षरेण मंत्रेण शैवेन विहिताङ्कुराः ॥ ॥ शूद्र उवाच ॥ ॥ व्रतचर्या त्वया वा सा मोक्ता संजायते कथम् ॥ ७ ॥ ब्रह्मन्न् वि
स्तरतो ब्रूहि न तृप्ये तव चो मृतैः ॥ ८ ॥ ॥ गालव उवाच ॥ ॥ जपभस्मचरुद्राक्षं कपालस्फाटिकं तथा ॥ रुंडमाला पंचवक्त्रमर्द्धचन्द्रं
च मूर्धनि ॥ ९ ॥ चित्रकृत्तिव्याघ्रचर्मश्चानं कौपीनकुंडलद्वयं ॥ घंटायुग्मं त्रिशूलं च सूत्रं च यास्वरूपकम् ॥ १० ॥ अमीभिर्लक्षणैर्लक्ष्यं म
यो क्तेत्व शूद्रज ॥ अनेन विधिना सर्वे देवा वह्निपुरोगमाः ॥ ११ ॥ सर्वे आराधयामासुः सर्वपापैर्वरप्रदम् ॥ चातुर्मास्ये च संपूर्णे संपू
र्णे कार्तिके मले ॥ १२ ॥ चीर्णव्रतान् स्कन्दान् दृष्ट्वा विशन्धांश्च महेश्वरः ॥ मतिं तेषां ददौ तिष्ठो जीवात्मा सर्वभूतहृक् ॥ १३ ॥ शतरुद्रि
यजाप्येन विधानसहितेन च ॥ ध्यानेन दीपदानेन चातुर्मास्ये तुतोषसः ॥ १४ ॥ पूजनैः षोडशाविधैर्यथा विष्णोस्तथापरे ॥ कुर्वाणा
न् भक्तिभावेन ज्ञात्वा देवान् समागतान् ॥ १५ ॥ प्रहृष्टो भगवान् रुद्रो ददौ तेषां शंभुमातिं ॥ ततः समर्च्य ते देवा वह्निं रुक्त्वा यथार्थि
तः ॥ १६ ॥ प्रसन्नवदनं चक्रुः कार्यसाधनतत्परम् ॥ कर्मसाक्षी महातेजाः कृपा पारावतवपुः ॥ १७ ॥ प्रविवेश ततो मध्ये द्रष्टुं देवम
हेश्वरम् ॥ चकार गतिविक्षेपं गुंठनैश्च गुंठनैः १८ लोठनैः सर्पणैश्चैव चारुरूपोद्भुतगतिः ॥ तद्दृष्ट्वा भगवांस्तत्र कारणं समबुध्यत ॥
१९ ॥ ऊर्ध्वरेतास्ततस्तस्मिन् सुसज्जासौ दधारतम् ॥ वीर्यं वह्निसुरश्चैव सोल्पपातं गृहाद्बहिः ॥ २० ॥ गते तस्मिन् परं गेयपार्दतो वि
फलश्रमा ॥ सक्रुद्धा सर्वदेवानां साशशाप महेश्वरी ॥ २१ ॥ यस्मान्मम च्छा विहता भवद्भिर्दुष्टबुद्धिभिः ॥ तस्मात्साषाणतामद्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अजंतुत्रिदिवौकसः ॥ २२ ॥ निरपत्यानिर्दयाश्चसर्वेदेवाश्चविव्यथ ॥ ततःप्रसादयामासुःप्रणताशापयंत्रिताः ॥ २३ ॥ महद्दु
खसंप्रविष्टाःपुनःपुनरथाब्रुवन् ॥ २४ ॥ ॥ देवाऊचुः ॥ त्वंमातासर्वदेवानांसर्वसाक्षीसनातना ॥ उत्पत्तिस्थितिसंहारकार
णाजगतांसदा ॥ २५ ॥ भूतप्रकृतिरूपात्वंमहाभूतसमाश्रिता ॥ अपर्णातपसोधात्रीभूतधात्रीवसुंधरा ॥ २६ ॥ मंत्राराध्यामंत्र
बीजंविश्वबीजलयस्थितिः ॥ यज्ञादिफलधात्रीचस्वाहारूपेणसर्वदा ॥ २७ ॥ मंत्रयंत्रसमोपेताब्रह्मविष्णुशिवादिषु ॥ नित्य
रूपामहारूपासर्वरूपानिरंजना ॥ २८ ॥ दोषत्रयसमाक्रांतजननंश्रेयसप्रदा ॥ महालक्ष्मीमहाकालीमहादेवीमहेश्वरी ॥ २९
॥ विश्वेश्वरीमहामायामायाबीजवरप्रदा ॥ वररूपावरेण्यात्वंवरदात्रीवरासक्ता ॥ ३० ॥ बिल्वपत्रैःशुभैर्येत्वांपूजयंतिनराःसदा
॥ तेषांराज्यप्रदात्रीचकामदासिद्धिदासदा ॥ ३१ ॥ चातुर्मास्येऽर्चितायैस्त्वंबिल्वपत्रैर्विशेषतः ॥ तेषांवांछितसिद्ध्यर्थंजाताका
मदुघास्वयम् ॥ ३२ ॥ येत्वांयतिसदालोकेमहेश्वरसमन्विताम् ॥ बिल्वपत्रैर्महाभक्त्यानतेषांदुःखदुष्कृती ॥ ३३ ॥ चातुर्मास्येवि
शेषेणतवपूजामहाफला ॥ अद्यप्रभृतियैर्लोकेबिल्वपत्रैस्तुपूजिता ३४ विधास्यातिमहेशानितेषाज्ञीनमतुत्तमम् ॥ चातुर्मास्येऽ
धिकंफलंबिल्वपत्रैर्वरानने ॥ ३५ ॥ उमामहेश्वरप्रीत्यैदत्तंविधिवदक्षयम् ॥ यथाश्रीस्तुलसीवृक्षेतथाबिल्वेचपार्वती ॥ ३६ ॥ त्वं
मूर्त्यादृश्यसेविश्वसकलाभीष्टदायिनी ॥ चातुर्मास्येविशेषेणसेवितासिमहाफला ॥ ३७ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसं
वादेचातुर्मास्यमाहात्म्येइंद्रादीनांशापप्रदानंपैजवनोपाख्याननामचतुर्दशोऽध्यायः ॥ १४ ॥ ॥ पैजवनउवाच ॥ ॥ श्रीःकथंतु
लसीरूपाबिल्ववृक्षेचपार्वती ॥ एतच्चविस्तरेणत्वंमुनेतत्त्वंवदप्रभो ॥ १ ॥ ॥ गालवउवाच ॥ ॥ पुरादेवासुरेयुद्धेदानवाबलद

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्पिताः ॥ देवान्निर्जघ्नुः संग्रामे घोररूपाः सुदारुणाः ॥ २ ॥ देवाश्च भयसंविग्ना ब्रह्माणं शरणं ययुः ॥ ते स्तुत्वा पितरं नत्वा बृह
स्पतिपुरःसराः ॥ ३ ॥ तस्थुः प्राञ्जलयः सर्वे तानुवाच पितामहः ॥ किमर्थं स्वानिनिकरमस्मत्स्नेहमुपागताः ॥ ४ ॥ कारणं कथ्यतामा
शु वन्हीद्रवसुकाग्निर्युताः ॥ ॥ देवा ऊचुः ॥ ॥ दैत्यैः पराजितास्तात संगरेऽद्भुतकारिभिः ॥ ५ ॥ वयं सर्वे पराक्रान्ता अतस्त्वां शरणंग-
ताः ॥ त्राह्यस्मान्देवदेवेश शरणं समुपागतान् ॥ ६ ॥ तच्छ्रुत्वा भगवान्प्राह ब्रह्मा लोकपितामहः ॥ मया न शक्यते कर्तुं पक्षः क
स्य जनस्य च ॥ ७ ॥ वक्ष्याम्युपायं सन्दूर्माश्रितानां भवतां पुरा ॥ एकदा शिवभक्तानां विवादः सुमहानभूत् ८ समं केशवभक्तैश्च
परस्परजयैषिणः ॥ ततस्तु भगवान्क्रुद्धः स्वभृत्यानां च पश्यताम् ॥ ९ ॥ एकांविष्णुगणैः कुर्वन्दधे रूपं महाद्भुतम् ॥ तदा हरिहरा
ख्यं च देहार्द्धं नदधारसः ॥ १० ॥ हरश्चैवार्द्धदेहेन विष्णुरर्द्धेन चाऽभवत् ॥ एकं हि विष्णुचिन्हानि हरचिन्हानि चैकतः ॥ ११ ॥ ए
कतो वैनतेयश्च वृषभश्चान्यतोऽभवत् ॥ वामतो मेघवर्णाभो दक्षिणे हिमनिचयोपमः ॥ १२ ॥ कर्पूरगौरः सव्ये तु समजायत वै तदा
॥ द्वयोरैक्यसमं विश्वं विश्वमैक्यमवर्त्तत ॥ १३ ॥ विभेदमतयो नष्टाः श्रुतिस्मृत्यर्थबाधकाः ॥ पाखण्डिनो हैतुकाश्च सर्वे विस्म
यमागमन् ॥ १४ ॥ स्वसन्मार्गं परित्यज्य ययुर्निर्वाणपद्धतिम् ॥ मन्दरे पर्वते श्रेष्ठे सा मूर्तिर्नित्यसंस्कृता ॥ १५ ॥ प्रमथाद्यैर्गणैः
श्चैव वर्त्तते ऽद्यापि निश्चला ॥ सृष्टिस्थित्यन्तकर्त्री सा विश्वबीजमनन्तका ॥ १६ ॥ महेशविष्णुसंयुक्ता साक्षाद्भूतपापनाशिनी ॥
योगिध्येया ससत्या च सत्त्वाधारगुणातिगा ॥ १७ ॥ मुमुक्षवोऽपि तां ध्यात्वा प्रयान्ति परमं पदम् ॥ चातुर्मास्ये विशेषेण ध्यात्वा
मर्त्योऽह्यमानुषः ॥ १८ ॥ तत्र गच्छन्तु यूयं ते यस्य देवः शं विधास्यति ॥ इत्युक्त्वा भगवांस्तेषां तत्रैवान्तरधीयत ॥ १९ ॥ तेऽपि वह्निमु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चा॰मा॰ खादेवाः प्रजग्मुर्मंदराचलम् ॥ बभ्रमुस्तत्रतत्रैवविचिन्वानामहेश्वरम् ॥ २० ॥ पार्वतींबिल्ववृक्षस्थांलक्ष्मींचतुलसीगताम् मा॰अ॰
१७ ॥आदिसर्ववृक्षमयंपूर्वंविश्वमजायत ॥ २१ ॥ एतेवृक्षामहाश्रेष्ठाःसर्वेदेवांशसंभवाः ॥ एतेषांस्पर्शनादेवसर्वपापैःप्रमुच्यते १५
॥ २२ ॥ चातुर्मास्येविशेषेणमहापापौघहारिणा ॥ यदातेनवददृशुर्देवास्त्रिभुवनेश्वरम् ॥ २३ ॥ तदाकाशभवावाणीप्राहदेवा
न्यथार्थतः ॥ ईश्वरःसर्वभूतानांकृपयावृक्षमाश्रितः ॥ २४ ॥ चातुर्मास्येऽथसंप्राप्तेसर्वभूतदयाकरः ॥ अश्वत्थोऽतःसदासे
व्योमदवारेविशेषतः ॥ २५ ॥ नित्यमश्वत्थसंस्पर्शात्पापंयातिसहस्रधा ॥ दुग्धेनतर्पणाच्चैवतिलमिश्रेणभक्तितः ॥ सेचनंवाकरि
ष्यतितृप्तिस्तस्यपूर्वजेषुच ॥ २६ ॥ दर्शनादेववृक्षस्यपातकंतुविनश्यति ॥ पिप्पलःपूजितोध्यातोदृष्टःसेवितएववा ॥ २७ ॥ पाप
रोगविनाशायचातुर्मास्येविशेषतः ॥ अश्वत्थपूजितःसिक्तःसर्वभूतसुखावहम् ॥ २८ ॥ सर्वामयहरंचैवसर्वपापौघहारिणम् ॥
येनराःकीर्तयिष्यंतिनामाश्वत्थवृक्षजम् ॥ २९ ॥ नतेषांयमलोकस्यभयंमार्गेप्रजायते ॥ कुंकुमैश्चंदनैश्चैवस्फालिक्षयश्चका
रयेत् ॥ ३० ॥ तस्यतापत्रयाभावोवैकुंठगणताभवेत् ॥ दुःस्वप्नंदुष्टचिंताचदुष्टज्वरपराभवाः ॥ ३१ ॥ विलयंनयपापानिपिप्पल
लहरिप्रिये ॥ मंत्रेणानेनयेदेवाःपूजयिष्यंतिपिप्पलम् ॥ ३२ ॥ ततस्तेषांधर्मराजोजायतेवाक्यकारकः ॥ अश्वत्थोवचनेनापि-
प्रोक्तोज्ञानप्रदोभवेत् ॥ ३३ ॥ श्रुतंहरतिपापानिजन्मादौमरणावधि ॥ अश्वत्थसेवनंपुण्यंचातुर्मास्येविशेषतः ॥ ३४ ॥ स्कंददेवे-
वृक्षमध्यमास्थायभगवान्प्रभुः ॥ जलंपृथ्वीगतंसर्वंप्रपिबन्निवसेवने ॥ ३५ ॥ जलंविष्णुर्जलेनाविष्णुरेवरसोमहान् ॥ त- १७
स्माद्वृक्षगतोविष्णुश्चातुर्मास्येऽघनाशनः ॥ ३६ ॥ सर्वभूतगतोविष्णुराप्याययतिवैजगत् ॥ तथाऽश्वत्थगतोविष्णुर्योनमस्येन्नः

CC-0. In Public Domain. Digitization by eGangotri

नारकी ॥ ३७ ॥ अश्वत्थंरोपयेद्यस्तु पृथिव्यांप्रयतोनरः ॥ तस्यपापसहस्राणिविलयंयांति तत्क्षणात् ॥ ३८ ॥ अश्वत्थःसर्ववृक्षा
णांपवित्रोमंगलान्वितः ॥ सुक्तितोरोपितोध्यातश्चातुर्मास्येऽघनाशनः ॥ ३९ ॥ अश्वत्थेचरणंदत्वाब्रह्महत्याप्रजायते ॥ निष्कारणं
संकुचित्वानरकेपच्यतेध्रुवं ॥ ४० ॥ मूलेविष्णुःस्थितोनित्यंस्कंधेकेशवएवच ॥ नारायणस्तुशाखासु पत्रेषुभगवान्हरिः ॥ ४१ ॥
फलेऽच्युतानसंदेहःसर्वदेवैःसमन्वितः ॥ चातुर्मास्येविशेषेणदेवःपूज्यःसमुक्तिभाक् ॥ ४२ ॥ तस्मात्सर्वप्रयत्नेनसदैवाऽश्व-
त्थसेवनम् ॥ यःकरोतिनरोभक्त्यापापंयाति दिनोद्भवम् ॥ ४३ ॥ सएवविष्णुर्द्रुमएवमूर्तोमहात्मभिःसेवितपुण्यमूलः ॥ य-
स्याश्रयःपापसहस्रहंताभवेन्नृणांकामदुघोगुणाढ्यः ॥ ४४ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्ये
पैजवनोपाख्यानेअश्वत्थमहिमावर्णननामपंचदशोऽध्यायः ॥ १५ ॥ ॥ ब्रह्मोवाच ॥ ॥ पलाशोहररूपेणसेव्यतेहसुराधिपैः
बहुभिरुपचारैश्चब्रह्मवृक्षस्यसेवनम् ॥ १ ॥ सर्वकामप्रदंप्रोक्तंमहापातकनाशनम् ॥ त्रीणिपत्राणिपालाशमध्यमंविष्णुराश्रि
तम् ॥ २ ॥ वामेब्रह्मादक्षिणेचहरएषःप्रकीर्तितः ॥ पालाशपत्रेयोभुंक्तेनित्यमेवनरोत्तमः ३ अश्वमेधसहस्रस्यफलंप्राप्नोत्यसंं
शयः ॥ चातुर्मास्येविशेषेणप्रोक्तंमोक्षप्रदंभवेत् ॥ ४ ॥ पयसावाथदुग्धेनरविवारेदिशयदि ॥ चातुर्मास्येऽर्चितोयेनतुतेयांति
परमंपदम् ॥ ५ ॥ दृश्यतेयदिपालाशःप्रातरुत्थायमानवैः ॥ नरकान्सुनिर्धूयगम्यतेपरमंपदम् ॥ ६ ॥ पालाशःसर्वदेवाना-
माधारोधर्मसाधनम् ॥ यत्रालाभस्तुवृक्षाणांतत्रपूज्योमहातरुः ॥ ७ ॥ यथासर्वेषुवर्णेषुविप्रोमुख्यतमोभवेत् ॥ मध्येसर्वत-
रूणांचब्रह्मवृक्षोमहोत्तमः ॥ ८ ॥ यस्यमूलेहरोनित्यंस्कंधेमूलधरःस्वयं ॥ शाखासुभगवान्रुद्रःपुष्पेषुत्रिपुरांतकः ॥ ९ ॥ शिवःप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रेषु वासति फले गणपतिस्तथा ॥ गंगापरित्वचायांतु मज्जायां भगवान् भवः ॥ १०॥ ईश्वरस्तत्प्रशाखासु सर्वोयं हरवल्लभः ॥ हरः
कर्पूरधवलो यया वह्निर्णितः सदा ११ तथाह्ययं ब्रह्मरूपः सितवर्णो महाभुगः ॥ चिंतितो रिपुनाशाय पापसंशोषणाय च ॥ १२ ॥
॥ मनोरथप्रदानाय जायते नात्र संशयः ॥ गुरुवारसमायाते चातुर्मास्ये तथैव च ॥ १३ ॥ पूजितस्तु ततो ध्यातः सर्वदुःखविनाशकः
॥ १४ ॥ देवस्तत्त्वोदेव बीजं परयन्मूर्त्तिब्रह्मब्रह्मवृक्षत्वमासमम् ॥ नित्यं सेव्यः स्वहृदयास्थाणुरूपश्चातुर्मास्ये सेवितः पापहा स्यात् ॥
॥ १५ ॥ ॥ इतिश्रीस्कंदपुराणे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपाख्याने पालाशब्राह्मवर्णनं नाम षोडशो ऽध्यायः
॥ १६ ॥ ॥ ब्रह्मोवाच ॥ ॥ तुलसी रोपिता येन गृहस्थेन महाफला ॥ गृहे तस्य न दारिद्र्यं जायते नात्र संशयः ॥ १ ॥ तुलस्या दर्श
नाद्देवपापराशिर्निवर्त्तते ॥ श्रियेमृतकणोत्पन्ना तुलसी हरिवल्लभा ॥ २ ॥ पिबंत्या रुचिरं पानं प्राणिनां पापहारिणी ॥ यस्यास्तु पवसल्ल
क्ष्मीः स्कंधे सागरसंभवा ॥ ३ ॥ पत्रे तु सततं श्रीश्च शाखासु कमला स्वयम् ॥ इंदिरा पुष्पगा नित्यं फले क्षीराब्धिसंभवा ॥ ४ ॥ तुलसी
शूकं काष्ठे पुष्परूपा विश्वव्यापिनी ॥ मज्जायां पद्मवासा च त्वचा सूक्ष्मा हरिप्रिया ॥ ५ ॥ सर्वरूपा च सर्वेशा परमानंददायिनी ॥ तु
लसीप्राशको मर्त्यो यमलोकं न गच्छति ॥ ६ ॥ शिरस्था तुलसी यस्य नयामैरभिभूयते ॥ मुखस्था तुलसी यस्य निर्वाणपददायिनी ॥ ७
॥ हस्तस्था तुलसी यस्य संतापत्रयवर्जितः ॥ तुलसी हृदयस्था च प्राणिनां सर्वकामदा ॥ ८ ॥ स्कंधस्था तुलसी यस्य स पापेन च लिप्यते
॥ कंठगा तुलसी यस्य जीवन्मुक्तः सदा हि सः ॥ ९ ॥ तुलसीसंभवं पत्रं सदा वहति यो नरः ॥ मनसा चिंतितां सिद्धिं संप्राप्नोति न संश
यः ॥ १० ॥ तुलसी सर्वकार्यार्थसाधिनी दुःखवारिणीम् ॥ यो नरः प्रत्यहं सिंचेन्न स याति यमालयम् ॥ ११ ॥ चातुर्मास्ये विशेषेण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वंदितापिविमुक्तिदा ॥ नारायणंजलगतंज्ञात्वावृक्षगतंतथा॥१२॥ प्राणिनांकृपयालक्ष्मीस्तुलसीवृक्षमाश्रिता ॥ चातुर्मास्येसमा
यातेतुलसीसेवितायदि ॥ १३ ॥ तेषांपापसहस्राणियांतिनित्यंसहस्रधा॥ गोविंदस्मरणंनित्यंतुलसीवनसेवनम् ॥ १४ ॥ तुलसी-
सेचनंदुग्धेश्चातुर्मास्येऽतिदुर्लभम् ॥ तुलसींवन्दयेद्यस्तु मानवोयदिश्रद्धया ॥ १५ ॥ आलवालांबुदानैश्च पावितंसकलंकुलम् ॥ य
स्यांश्रीस्तुलसीसंस्थानित्यमेवहिवर्धते ॥ १६ ॥ तथातथागृहस्थस्यकामवृद्धिःप्रजायते ॥ ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा
॥१७॥ तथाप्रकृतयःसर्वास्तुलसीसेवनेरताः ॥ श्रद्धयायदिजायंतेनतासांदुःखदोहरिः ॥ १८ ॥ एकोहरिःसकलवृक्षगतोविभा-
तिनानारसेनपरिभावितमूर्तिरेव ॥ वृक्षादिवासमगमत्कमलापिदेवीदुःखादिनाशनकरीसततंस्मृतापि ॥ १९ ॥ ॥ इतिश्री-
स्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येपैजवनोपाख्यानेतुलसीमाहात्म्यवर्णनंनामसप्तदशोऽध्यायः ॥ १७ ॥ ॥
वाण्युवाच ॥ ॥ बिल्ववृक्षस्यमाहात्म्यंकथितुंनैवशक्यते ॥ तवोद्देशेनवक्ष्यामिमहद्रूशृणुतत्वतः ॥ १ ॥ विहाराश्रममापन्नादे
वीगिरिसुताशुभा ॥ ललाटफलकेतस्याःस्वेदबिंदुरजायत ॥ २ ॥ सप्रवान्याधिनिक्षिप्तोभूतलेनिपपातच ॥ महातरुरयंजातोम
दरपर्वतोत्तमे ॥ ३ ॥ ततःशैलसुतातत्ररममाणाययौपुनः ॥ दृष्ट्वावनगतंवृक्षंविस्मयाकुललोचना ॥ ४ ॥ जयांचविजयांचैवप
प्रच्छचसखीद्वयम् ॥ कोऽयंमहातरुर्दिव्योविभातिवनमध्यगः ॥ ५ ॥ दृश्यतेरुचिराकारोमहाहर्षकरोह्ययम् ॥ ॥ जयोवाच ॥ ॥
देविस्वेदसंभूतोवृक्षोऽयंस्वेदबिंदुजः ॥ ६ ॥ नाम्नास्यकुरुवैक्षिप्रंपूजितःपापनाशनः ॥ ॥ पार्वत्युवाच ॥ ॥ यस्मात्क्षोणितलं-
भित्वाविशिष्टोयंमहातरुः ॥ ७ ॥ उदतिष्ठत्समीपेमेतस्माद्बिल्वोभवत्त्वयम् ॥ इमंवृक्षंसमासाद्यभक्तितःपत्रसंचयं ८ आहरिष्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चा॰मा॰ त्यसौराजाभविष्यत्येवभूतले ॥ यः करिष्यति मेपूजांपत्रैःश्रद्धासमन्वितः॥ ९ ॥ यंयंकाममभिध्यायेत्तस्याः सिद्धिःप्रजायते॥यो मा॰अ॰
११ दृष्ट्वाबिल्वपत्राणिश्रद्धामपिकरिष्यति॥ १० ॥पूजनाद्यायधियेधनदाऽहंनसंशयः ॥ पत्राग्रप्राशनेयस्तु करिष्यति मनोयदि ॥ १८
तस्यपापसहस्राणियास्यंतिविलयंस्वयं ॥ ११ ॥ शिरः पत्राग्रसंयुक्तंकरोतियदिमानवः॥ नयामीयातना ह्यस्यदुःखदात्रीभवि-
ष्यति॥ १२ ॥ इत्युक्त्वापार्वतीहृष्टाजगामभवनंस्वकम् ॥सखीभिः सहितादेवीगणैरपिसमन्विता ॥ १३ ॥ ॥वायुरुवाच॥ ॥
अयंबिल्वतरुः श्रेष्ठः पवित्रःपापनाशनः ॥ तस्यमूलेस्थितादेवीगिरिजानात्रसंशयः॥ १४ ॥स्कंधेदाक्षायणीदेवीशाखासुचमहे-
श्वरी॥ पत्रेषुपार्वतीदेवीफलेकात्यायनीस्मृता ॥१५॥ त्वचिगौरीसमाख्याताअपर्णामध्यवल्कले ॥पुष्पेदुर्गासमाख्याताउमाशाखा
ग्रकेषुच॥ १६ ॥कंटकेषुचसर्वेषुकोटयोनवसंख्यया॥ शक्तयःप्राणिरक्षार्थंसंस्थितागिरिजाज्ञया ॥ १७॥ तांभजंतिसुपत्रैश्चपू-
जयंतिसनातनात् ॥ यंयंकामयतेकामं तस्यसिद्धिर्भवेद्ध्रुवम्॥ १८ ॥ महेश्वरीसागिरिजामहेश्वरी विशंकररूपाजनमोक्षधात्री॥
हरंचदृष्ट्वाऽयपलाशमाश्रितस्वलीलयाबिल्ववपुश्चकारसा ॥ १९ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहा-
त्म्येपैजवनोपाख्यानेबिल्वोत्पत्तिवर्णननामाष्टादशोऽध्यायः ॥ १८॥ ॥ गालवउवाच॥ ॥ इत्युक्त्वाकाशजावाणीविरराम शं-
प्रदा॥ तेऽपिदेवास्तदाश्चर्यंमहदृष्ट्वा महाव्रताः॥ १ ॥ चतुष्टयंचवृक्षाणांचातुर्मास्येसमागते अपूजयंश्चविधिवदेवस्यप्रभाव
नशूद्रज॥ २ ॥चातुर्मास्येऽथसंपूर्णेदेवो हरिहरात्मकः॥ प्रसन्नस्तानुवाचाथ भक्त्याप्रत्यक्षरूपधृक् ॥३॥ यूयंगच्छथदूपेशा ११
महाव्रतपरायणाः॥ शुक्लध्वस्तांश्चाऽधिकारान् मयातेदानबाहुताः॥ ४ ॥ इत्युक्तोदेवदेवेशोविश्वरूपधरोयदा ॥ गणानादेव-

CC-0. In Public Domain. Digitization by eGangotri

तानांचबुद्धिनिर्भेदंतांतदा ॥ ५ ॥ नृत्यंतौतौतदाईशौबभूवतुररिंदमौ ॥ तेपिदेवानिराबाधाहृष्टचित्ताउअभेदतः ॥ ६ ॥ प्रय
युः स्वांस्वाधिकारान्विमानगणकोटिभिः ॥ ॥ गालवउवाच ॥ ॥ तयातत्रापितेदेवापार्वत्याशापमोहिताः ॥ ७ ॥ स्तुत्वाता
बिल्वपत्रैश्चपूजयित्वामहेश्वरीम् ॥ प्रसन्नवदनास्तत्वाप्रणिपत्यपुनःपुनः ॥ ८ ॥ साप्रोवाचततोदेवान्विश्वमातातुसत्कृ
ता ॥ ममशापोवृथानैवभविष्यतिसुरोत्तमाः ॥ ९ ॥ तथापिकृतपापानांकरवाणिकृपांचवः ॥ स्वर्गेहृष्यन्मयानैवभविष्यथसु
रोत्तमाः ॥ १० ॥ मर्त्यलोकंचसंप्राप्यप्रतिमासुचसर्वशः ॥ सर्वेदेवाश्चवरदालोकानांप्रभविष्यथ ॥ ११ ॥ पाणिग्रहणावि
हितायेकुमाराःकुमारिकाः ॥ तेषांतेषांप्रजाश्चैवभविष्यथनसंशयः ॥ १२ ॥ इत्युक्त्वासाभगवतीदेवतानांवरप्रदा ॥ विष्णु
महेश्वरंचैवप्रोवाचकुपिताभृशम् ॥ १३ ॥ देवास्तस्याभयान्नष्टामर्त्येषुप्रतिमांगताः ॥ भक्तानामानसंभावपूरयंतुसुसंस्थि
ताः ॥ १४ ॥ तस्माद्विष्णोमहेशानत्वयापिननिषेधितः ॥ तस्मात्त्वमपिपाषाणोभविष्यसिनसंशयः ॥ १५ ॥ हरोप्यश्ममयंरूपं
प्राप्यरूपंविगर्हितम् ॥ लिंगाकारंविप्रशापान्ममदुःखमवाप्स्यति ॥ १६ ॥ तच्छ्रुत्वाभगवान्विष्णुःपार्वतीमनुकूलयन् ॥ उवा
चप्रणतोभूत्वाहरभार्यांमहेश्वरीम् ॥ १७ ॥ ॥ श्रीविष्णुरुवाच ॥ ॥ महाव्रतेमहादेवीमहादेवप्रियासदा ॥ त्वंहिसत्वरजस्याच
तामसीशक्तिरुत्तमा ॥ १८ ॥ मात्रात्रयसमोपेतागुणत्रयविभाविनी ॥ मायादीनांजननीत्वंविष्णुव्यापकरूपिणी ॥ १९ ॥ दे
वत्रयस्तुतात्वंचसाध्यारूपेणरागिणी ॥ अरूपासर्वरूपात्वंजनसंतानदायिनी ॥ २० ॥ फलवेलामहाकालीमहालक्ष्मीसरस्व
ती ॥ ओंकारश्चवषट्कारस्त्वमेवहिसुरेश्वरि ॥ २१ ॥ भूतधात्रीनमस्तेस्तुशिवायैचनमोस्तुते ॥ रागिण्यैचविरागिण्यैविकरालेनमः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चा॰मा॰ सुभे ॥ २२ ॥ एवंस्तुत्वाप्रसन्नाक्षीप्रसन्नेनांतरात्मना ॥ उवाचपरमोदारंमिथ्यारोषयुतंवचः ॥ २३ ॥ मच्छापोनान्यथाभावी मा॰
२० जनार्दनतवाप्ययम् ॥ तत्रापिसंस्थितस्त्वंहियोगीश्वरविमुक्तिदः ॥ २४ ॥ कामप्रदश्चभक्तानांचातुर्मास्येविशेषतः ॥ निम्नगा २०
गंडकीनामब्रह्मणोदयितास्मृता ॥ २५ ॥ पापापसारसंभूतापुण्यदात्रीमहाजला ॥ तस्याःस्वविमलेनीरेतववासोभविष्यति ॥
॥ २६ ॥ चतुर्विंशतिभेदेनपुराणज्ञैर्निरीक्षितः ॥ मुखजांबुनदंचैवशालग्रामःप्रकीर्तितः ॥ २७ ॥ वर्तुलस्तेजसःपिंडःश्रियायुक्तो-
भविष्यति ॥ सर्वसामर्थ्यसंयुक्तोयोगिनामपिमोक्षदः ॥ २८ ॥ येत्वांशिलागतंविष्णुंपूजयिष्यंतिमानवाः ॥ तेषांस्वचिंतिता
सिद्धिंभक्तानांसंप्रयच्छसि ॥ २९ ॥ शिलागतंचदेवेशंतुलस्याभक्तितत्पराः ॥ पूजयिष्यंतिमनुजास्तेषांमुक्तिर्नदूरतः ॥ ३० ॥ शि
लास्थितंचयःपश्येत्त्वांविष्णुंप्रतिमागतं ॥ स्वचक्रांकितसर्वांगंनसगच्छेद्यमालयम् ॥ ३१ ॥ ॥ गालवउवाच ॥ ॥ इतितेकथि
तंसर्वंशालग्रामस्यकारणम् ॥ यथासभगवान्विष्णुःपाषाणत्वमुपागतः ॥ ३२ ॥ गोविंदोपिमहाशापंलब्ध्वास्वभवनंगतः ॥
पार्वतीचमहेशानंकुपितांप्रपामस्यच ॥ ३३ ॥ एवंसएवभगवान्भगभूतभव्यभूतादिकृत्सकलसंस्थितिनाशनाकः ॥ सोपि-
श्रियासहभवोपिगिरीशःपुत्र्यासार्द्धंचतुर्षुचद्रुमेषुनिवासमाप ॥ ३४ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमा-
हात्म्येपञ्चवनोपाख्यानेविष्णुशापोनामएकोनविंशोध्यायः ॥ १९ ॥ ॥ ब्रह्मोवाच ॥ ॥ महदाश्चर्यमेतद्धियत्सुरावृक्षरूपिणः
॥ चातुर्मास्येसमायाते सर्वेवृक्षनिवासिनः ॥ १ ॥ भगवन्केसुरास्तेतुकेषुकेषुनिवासिनः ॥ एतद्विस्तरतोब्रूहिममानुग्रहकाम्य २०
या ॥ २ ॥ ॥ गालवउवाच ॥ ॥ अमृतंजलमित्याहुश्चातुर्मास्येतदिच्छया ॥ लीलयाविधृतंदेवैःपिबंतिद्रुमदेवताः ॥ ३ ॥ तस्यपा

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नान्महातृप्तिर्जायतेनात्रसंशयः ॥ बलंतेजश्चकांतिश्चसौख्यंबलघुविक्रमः ॥ ४ ॥ गुणाएतेप्रजायंतेपानात्कृष्णांशसंभवात्
नित्यामृतस्यपानेनबलंस्वल्पंप्रजायते ॥ ५ ॥ भोजनेनतत्प्रशंसंति नित्यमेतन्नसंशयः ॥ तस्माच्चतुर्षुमासेषुपिबंतिजलमेव
हि ॥ ६ ॥ वृक्षस्थाः पितरोदेवाःप्राणिनांहितकाम्यया ॥ वृक्षाणांसेवनंश्रेष्ठंसर्वमासेषुसर्वदा ॥ ७ ॥ चातुर्मास्येविशेषेणसेवि
ताःसौख्यकारकाः ॥ तिलोदकेनवृक्षाणांसेचनंसर्वकामदम् ॥ ८ ॥ क्षीरवृक्षाःक्षीरयुक्तैस्तोयैःसिक्ताःशुभप्रदाः ॥ चतुर्ष्वपि
तुवृक्षाणांयच्चोक्तंपूर्वंतामया ॥ ९ ॥ चातुर्मास्येविशेषेणसर्वकामफलप्रदम् ॥ ब्रह्मातुवटमाश्रित्यप्राणिनांसर्ववरप्रदः ॥ १० ॥
सावित्रीजलमास्थायपवित्रंश्वेतभूषणम् ॥ एकैकदेवविशेषेणातिलसेवामहाफला ॥ ११ ॥ तिलाःपवित्रमतुलंतिलाधर्मार्थसा
धकाः ॥ तिलामोक्षप्रदाश्चैवतिलापापापहारिणः ॥ १२ ॥ तिलाविशेषफलदास्तिलाःशत्रुविनाशनाः ॥ तिलाःसर्वेषुपुण्येषुप्र-
थमंसमुदाहृताः ॥ १३ ॥ नतिलाधान्यमित्याहुर्देवधान्यमितिस्मृतम् ॥ तस्मात्सर्वेषुदानेषुतिलदानंमहोत्तमम् ॥ १४ ॥ कन
केनसुतायेनातिलादत्तास्तुकशूद्रज ॥ ब्रह्महत्यादिपापानांविनाशस्तेनवैकृतः ॥ १५ ॥ सावित्रीचतिलाःप्रोक्ताःसर्वकार्यार्थ-
साधकाः ॥ तिलैस्तुतर्पणंकुर्याच्चातुर्मास्येविशेषतः ॥ १६ ॥ तिलानांदर्शनंपुण्यंस्पर्शनंसेवनंतथा ॥ हवनंभक्षणंचैवशरीरो
द्वर्तनंतथा ॥ १७ ॥ सर्वथातिलवृक्षोऽयंदर्शनादघपापहा ॥ चातुर्मास्येविशेषेणसेवितःसर्वसौख्यदः ॥ १८ ॥ महेंद्रोयवमा-
स्थायस्थितोभूतहितेरतः ॥ यवस्यसेवनंपुण्यंदर्शनंस्पर्शनंतथा ॥ १९ ॥ यवैस्तुतर्पणंकुर्याद्देवानांदत्तमक्षयम् ॥ प्रजानांपत
यःसर्वेचूतवृक्षमुपाश्रिताः ॥ २० ॥ गंधर्वामलयवृक्षमगरुंगणनायकः ॥ समुद्रावेतसंघुस्तंयक्षाःपुन्नागमेवच ॥ २१ ॥ नागवृ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षे तथानागाः सिन्धाः कंकोलकंद्रुमम् ॥ गुह्यकाः पनसंचैव किंनरामरिचाः स्मृताः ॥२२॥ यष्टीमधुंसमाश्रित्य कंदर्पोभूद्व्य
वस्थिताः ॥ रक्तांजनं महावृक्षे वन्हिराश्रित्यातिष्ठति ॥२३॥ यमोविभीतकंचैव बकुलं नैरृताधिपः ॥ वरुणः खर्जूरीवृक्षं पूगवृक्षं
चमारुतः ॥२४॥ धनदः खाटकवृक्षं रुद्राक्षं बदरीद्रुमं ॥ सप्तर्षीणां महातालां बहुलम्बाः मेरवृतः ॥२५॥ जंबूमेघपरिवृतः कृ-
ष्णवर्णोधनाशनः ॥ कृष्णस्यसदृशोवर्णस्तेनजंबूनगोत्तमः ॥२६॥ तत्फलैर्वा सः देवस्तत्प्रीतोभवतिदानतः ॥ जंबूवृक्षंसमाश्रि
त्यकुर्वीतद्विजभोजनम् ॥२७॥ तेषांप्रीतोहरिर्दद्यात्पुरुषार्थचतुष्टये॥ चातुर्मास्येसमायातेसुप्तेदेवजनार्दने ॥२८॥ ब्राह्मणा
न्भोजयेद्यस्तुसपत्नीकान्शुचिस्थितः ॥ तेननारायणस्तुष्टोभवल्लक्ष्मीसहायवान् ॥२९॥ लक्ष्मीनारायणप्रीत्यैवस्त्रालंकरणैः
शुभैः ॥ परिधाप्यसपत्नीकान्कृतकृत्योभवेन्नरः ॥३०॥ यद्यार्चितयेनैव वृद्धाशोकप्रभवेनच ॥ यत्फलजायतेतच्चजंबुनाद्वि
जभोजनात् ॥३१॥ तस्मिन्दिनेएकभक्तंकार्यंस्कृतकृत्तदा ॥ बहुनाचकिमुक्तेनजंबूवृक्षप्रपूजनात् ॥३२॥ पुत्रपौत्रधनैर्यु
क्तोजायतेनात्रसंशयः ॥ जंबूमेघैः परिवृताविद्युताशोकएवच ॥३३॥ वसुभिः स्वीकृतोनित्यंप्रियालश्चमहानगः ॥ आदि-
त्यैस्तुजपावृक्षोह्यश्विभ्यांमदनस्तथा ॥३४॥ विश्वेभिश्चमधूकश्चगुग्गुलः पिशिताशनैः ॥ सूर्येणार्कः पवित्रेणसोमे-
नाथत्रिपत्रकं॥ ३५॥ खदिरोभूमिपुत्रेणअपामार्गोबुधेनच॥ अश्वत्थोगुरुणाचैवशुक्रेणाथदुरस्तथा ॥३६॥ शमीशनैश्च
रेणायस्वीकृताशूद्रजातिभिः ॥ राहुणास्वीकृतादूर्वापितृणांतर्पणोचिता ॥३७॥ विष्णोश्चदयितानित्यंचातुर्मास्येविशेष
षतः ॥ केतुनास्वीकृतादर्भायाज्ञिकेयामहाशुभाः ॥३८॥ विनायकेनशुभंकर्मसंपूर्णनैवजायते ॥पवित्राणांपवित्रंयासग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लानांचमंगलम् ॥ ३९ ॥ मुमुर्षूणांमोक्षरूपोधरासंस्थोमहाद्रुमः ॥ अस्मिन्वसंतिसततंब्रह्मविष्णुशिवाःसदा ॥ ४० ॥ मू
लेमध्येतथाग्रेचयस्यनामार्पितंत्विदम् ॥ अन्येपिदेवावृक्षास्तेनधिश्रित्यमहाद्रुमाः ॥ ४१ ॥ प्रवर्ततेसमासेषुचतुर्षुचन
संशयः ॥ चातुर्मास्येदेवपत्न्यःसर्वावल्लीसमाश्रिताः ॥ ४२ ॥ प्रयच्छंतिनृणांकामान्वांछितान्सेविताअपि ॥ तस्मात्सर्वात्म
भावेनपिप्पलोयेनसेवितः ॥ ४३ ॥ सेविताःसकलावृक्षाश्चातुर्मास्येविशेषतः ॥ तुलसीसेवितायेनसर्ववल्यश्चसेविताः ॥
४४ ॥ आप्यायितंजगत्सर्वमाब्रह्मस्तंबसेवितम् ॥ चातुर्मास्येगृहस्थेनवानप्रस्थेनवापुनः ॥ ४५ ॥ ब्रह्मचारीयतीनांचसेवि
तामोक्षदायिनी ॥ एतेषांसर्ववृक्षाणांछेदनंनैवकारयेत् ॥ ४६ ॥ चातुर्मास्येविशेषेणविनायज्ञादिकारणम् ॥ एतदुक्तमशे
षेणयत्पृष्टोहमिहत्वया ॥ ४७ ॥ यथावृक्षत्वमापन्नादेवाःसर्वःपिशूद्रज ॥ ४८ ॥ अश्वत्थमेकपिचुमंदमेकंन्यग्रोधमेकंद-
शतिंत्तिणींच ॥ कपित्थबिल्वामलकीत्रयंचएताश्चवृक्षान्नरकंनपश्येत् ॥ ४९ ॥ सर्वदेवाविश्ववृक्षेशेयाश्चकृष्णाधाराःकृष्णा-
मध्याश्चकाश्च ॥ यस्मिन्देवसेवितेविश्वपूज्यसर्ववृक्षंजायतेविश्वमेतत् ॥ ५० ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादे
चातुर्मास्यमाहात्म्येवृक्षमाहात्म्यकथनंनामविंशोऽध्यायः ॥ २० ॥ ॥ शूद्रउवाच ॥ ॥ पार्वतीकुपितादेवीकथंदेवेनशूलि-
ना ॥ प्रसादितागताशांत्वायत्कोपात्कंप्यतेजगत् ॥ १ ॥ कथंसभगवान्रुद्रोब्राह्मणाच्छापमवापह ॥ वैकृतरूपमासाद्यपुनर्दि-
व्यवपुःस्थितः ॥ २ ॥ ॥ गालवउवाच ॥ ॥ देवारूपाणिदृश्यानिकृत्वादेव्यामहाभयात् ॥ मनुष्यलोकेसकलंप्रतिमास्वच सं
स्थिताः ॥ ३ ॥ तेषामपिप्रसन्नासानुग्रहंसमुपाकरोत् ॥ विष्णुरुक्तामहाभागाविश्वमाताघनाशिनी ॥ ४ ॥ तेषांबलाच्चपा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चा॰मा॰ र्वस्याः शापभारेणयंत्रितः ॥ तांनित्समेवानुनयन्नूचेभूधाचशंकरम् ॥ ५ ॥ एतेदेवाविश्वपूज्याविश्वस्यचवरप्रदाः ॥ मत्प्रसा
२२ दाद्भविष्यातिभक्तिंतस्ताधितान्नरैः ॥ ६ ॥ त्वामृतेममैकमेदंकृतसाधुविनिंदितम् ॥ वेद्याविवाहकालेचमत्प्रस्तः सर्वसाक्षिकः
॥ ७ ॥ यत्सप्तमंडलानांचगमनंचकरार्पणम् ॥ वन्हिश्चवरुणः कृष्णोदेवता श्चापिवत्सगाः ॥ चतुर्दिक्षुगसंयुक्तादेवब्राह्मणसं
युताः ॥ एतेषामग्रजोदिव्यकृत्वात्वंजनसंसदि ॥ ९ ॥ प्रमदासत्समापन्नोव्यभिचारंकथंकृथाः ॥ गुरवोऽपिनसन्मार्गप्रवर्तितेज
नाघवत् ॥ १० ॥ निग्राह्याः सर्वलोकेषुप्रबन्धैः श्रूयतेतदा ॥ पुत्रेणापिपिताशास्यः शिष्येणाऽपिगुरुः स्वयम् ॥ ११ ॥ क्षत्रियब्राह्मणः
शास्यो भार्ययाचपतिस्तथा ॥ उन्मार्गगामिनंश्रेष्ठमपिवेदांतपारगम् ॥ १२ ॥ नीचैरपिप्रशास्यंतश्रुतिराहसनातनी ॥ सन्मार्गएवसं
वेत्रपूज्यतेनापथः क्वचित् ॥ १३ ॥ येनस्वकुलजोधर्मस्त्याज्यः सपतितोभवेत् ॥ मृतश्चनरकंप्राप्यदुःखभारेणयुज्यते ॥ १४ ॥ धर्मं
त्यजतिनास्तिक्याज्ज्ञातिभेदमुपागतः ॥ सनिग्राह्यः सर्वलोकैमनुधर्मपरायणैः ॥ १५ ॥ कुलधर्मान्ज्ञातिधर्मान्देशधर्मान्महेश्व
र ॥ यस्त्यजतिजनावश्यंकुलस्यपतितोहिते ॥ १६ ॥ अग्नित्यागोव्रतत्यागोवचनत्यागएवच ॥ धर्मत्यागोनैवकार्यः कुर्वन्पतितएवहि
॥ १७ ॥ नपितानचतेमातानभ्रातास्वजनोऽपिच ॥ पश्यतेतववार्तांचअस्पृश्यत्वमदान्विषम् ॥ १८ ॥ अस्थिमालान्वितोभस्मजटाधारी
कुचैलवान् ॥ चपलोमुक्तमर्यादस्तस्मान्नाहसिमेयतः ॥ १९ ॥ अब्रह्मण्योव्रतीभिक्षुर्दुष्टात्मा कपर्दीसदा ॥ नार्हसित्वममधुरः संभाष
यितुमीश्वरः ॥ २० ॥ एवंसारुदतीदेवीबाष्पव्याकुललोचना ॥ महादुःखयुताआसीद्देवेशोऽनुनयत्यपि ॥ २१ ॥ पुनरेवमकुपिताहरमावाच २२
भामिनी ॥ तवार्जवंनहृदयंकठिनंवेद्मिनित्यदा ॥ २२ ॥ ब्राह्मणस्त्रीस्फुरैरुक्तंतन्मृषाप्रतिभातिमे ॥ यस्मान्मयिमहादुष्टभावएव

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृतस्त्वया ॥ २३ ॥ ब्राह्मणार्वचितायस्माद्ब्राह्मणैस्त्वंहनिष्यते ॥ एवमुक्त्वाभगवतीपुनराहनकिंचन ॥ २४ ॥ ईशः प्रसन्नवदना
मुपचारैरथाकरोत् ॥ शनैर्नीतिमयैर्वाक्यैर्हेतुमद्भिर्महेश्वरः ॥ २५ ॥ प्रसन्नलोचनांज्ञात्वाकिंचिदाहहरस्ततः ॥ कोपनकल्मषंवक्त्रं
पूर्णचन्द्रसमप्रभम् ॥ २६ ॥ कस्मात्त्वंकुरुषेभद्रेसुभ्रूमेववचोनते ॥ सर्वभूतदयाकार्याप्राणिनाहिहितेच्छया ॥ २७ ॥ यद्यपीशोपिय
स्यार्थेनिकार्यंपरपीडनम् ॥ जगत्सर्वंस्कृतप्रायतवास्तिवरवर्णिनि ॥ २८ ॥ जगत्पूज्यात्वमेवैकासर्वरूपधराऽनघे ॥ मयायदिकृतंक
र्मवेद्यंदेवहितायवै ॥ २९ ॥ तथाप्यवतवस्कृतोभविष्यतिनसंशयः ॥ अथवाममसर्वेभ्यः प्राणेभ्योपिगरीयसी ॥ ३० ॥ यदिच्छसितयाकु
र्यांतथातवमनोरथान् ॥ प्रसन्नवदनाभूत्वाकथयस्ववरानने ॥ ३१ ॥ इत्युक्त्वासाभगवतीपुनराहमहेश्वरम् ॥ चातुर्मास्येचसमा
प्तेमहाव्रतधरोयदि ॥ ३२ ॥ देवतानांचमर्त्यानांताडनंनतरोयदि ॥ पारयित्वाव्रतंसम्यक्ब्रह्मचर्यंमहेश्वर ॥ ३३ ॥ मर्त्यास्येयादेहा
न्वैष्णवंचप्रयच्छसि ॥ शापस्याऽनुग्रहंकुर्याःप्रसन्नवदनासती ॥ ३४ ॥ नान्ययामपिचित्तत्वाविश्वासमनुगच्छति ॥ नच्छला-
भगवांस्तकष्टस्तथेतिमत्स्कवाचताम् ॥ ३५ ॥ सापिदृष्ट्वाभगवतीशापस्याऽनुग्रहेकृता ॥ ३६ ॥ इदंपुराणंमनुजःशृणोतिश्रद्धायुक्तो
भद्बुध्यादृढत्व ॥ तस्यावश्यंजीवितंसर्वसिद्धमत्र्याःसत्यान्तच्छ्रयत्वंमयार्ति ॥ ३७ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादे
चातुर्मास्यमाहात्म्येपार्वत्यानुनयोनामैकविंशोऽध्यायः ॥ २१ ॥ ॥ सूतउवाच ॥ ॥ इदमाश्चर्यरूपंमेमतिभातिवचस्तव ॥ यद्य
पिस्यान्महाक्लेशोवदतस्तववस्कव्रत ॥ १ ॥ तथापिसभाग्येनमत्सुपर्यैमंद्गृहगतः ॥ नतृप्येत्वन्मुखांभोजाच्च्युतवाक्यामृतंपुनः ॥
२ ॥ पिबन्गौरीकथाख्यानंविशेषगुणपूरितम् ॥ कथंमहेश्वरोनृत्यंचकारस्फुरसंवृतः ॥ ३ ॥ चातुर्मास्येकथंजातंकिंग्राह्यंव्रतमुच्यते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भा॰मा॰ ॥अनुग्रहंकृतवतीसाकथंकोह्यनुग्रहः ॥४॥ एतद्विस्तरतोब्रूहिपृच्छतोमेद्विजोत्तम ॥ भगवान्पूज्यतेलोकेममानुग्रहकारकः मा॰अ॰
२३ ॥५॥ प्रसन्नवदनोभूत्वास्वस्थःकथयसुव्रत ॥ गालवस्थापितच्छ्रुत्वापुनराहप्रहृष्टवान् ॥६॥ ॥गालवउवाच॥ ॥इतिहासमि २२
मंपुण्यंकथयामितवानघ ॥ शृणुष्वाऽवहितोभूत्वायज्ञाश्रुतफलप्रदम् ॥७॥ चातुर्मास्येऽथसंप्राप्तेहरोभक्तिसमन्वितः ॥ ब्रह्मचर्-
यव्रतपरःप्रहृष्टवदनोऽभवत् ॥८॥ देवतानांचसंकल्पंमहर्षीणांचकारह ॥ समागत्यततोदेवा मंदराचलमास्थिताः ॥९॥ प्रणम्यत
महेशानंतस्थुःप्रांजलयोऽग्रतः ॥ तानुवाचशंकरान्सर्वान्हरोहृष्टःसमागतान् ॥१०॥ पार्वत्याभिहितंप्राहकस्मिन्कार्यांतरेसति ॥ भ
वानियुक्तोभिनयेयत्रसाहाय्यकारिणः ॥११॥ भवन्त्विद्धुरोगाश्चचातुर्मास्येसमागते ॥ ततथोचुश्चसंदृष्टानमस्कृत्यचशूलिनम्
॥१२॥ स्वंस्वंभुवनमाजग्मुर्विमानैःसूर्यसन्निभैः ॥ तथाषाढेशुक्लपक्षेचतुर्दश्यांमहेश्वरः ॥१३॥ प्रनर्तयितुमारेभेभवानीताषणा
यच ॥ मंदरेपर्वतेश्रेष्ठेतत्रजग्मुर्महर्षयः ॥१४॥ नारदोदेवलोव्यासःशुकद्वैपायनादयः ॥ अंगिराश्चमरीचिश्चकर्दमश्चप्रजापतिः ॥
१५ ॥ कश्यपोगौतमश्चात्रिर्वसिष्ठोभृगुरेवच ॥ जमदग्निस्तथोत्तकोरामोभार्गवएवच ॥१६॥ अगस्त्यश्चपुलोमाचपुलस्त्यःपुलहस्तथा
॥ प्रचेताश्चक्रतुश्चैवतथैवान्येमहर्षयः ॥१७॥ सिद्धायक्षाःपिशाचाश्चपन्नगाश्चारणैःसह ॥ आदित्यागुह्यकाश्चैवसाध्याश्चवस
वोऽश्विनौ ॥१८॥ एतेसर्वेतथदृष्ट्वाब्रह्माविष्णुपुरोगमाः ॥ समाजग्मुर्महेशस्यनृत्यदर्शनलालसाः ॥१९॥ ततोगणानंदिसुरवाल्ला
निप्रदद्दुस्तथा ॥ भूषणानिचवासांसिमुन्यादिषुयथाक्रमम् ॥२०॥ ततोवाद्यसहस्रेषुवादित्रेषुसमंततः ॥ सर्वैर्जयेतिचेवोक्तोभगवा २३
न्प्रयतमादिशन् ॥२१॥ भवानीदृष्टहृदयामहादेवंव्यलोकयत् ॥ जयाचविजयाचैवजयंतीमंगलारुणा ॥२२॥ चतुष्टयसखीमध्ये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विरराजशुभाननाना॥ तस्याःसान्निध्ययोगेनजगद्भातिगुणोत्तरम् ॥ २३ ॥यस्याः शरीरजाःशोभावर्णितुंनैवशक्यते ॥ ईशोःपि
गणकोटीभिर्नानावक्त्राभिरीक्षितः ॥ २४ ॥ पिशाचभूतसंघैश्चवृतः परमशोभनः ॥ स्वर्णघैचधरोनंदीवक्त्रोकपिमुखोवृतः ॥
२५ ॥ विद्याधराश्चगंधर्वाचित्रसेनादयस्तथा ॥ चित्रन्यस्ताइवबभुस्तत्रनागामुनीश्वराः ॥ २६ ॥श्रीरागप्रमुखाःरागास्तस्यपुत्रा
महौजसः ॥ अमूर्ताश्चैवतेपुत्राहरदेहसमुद्भवाः ॥ २७ ॥ एकैकस्यचषट्भार्याःसर्वासांचपितामहः ॥ ताभिःसहैवतेरागा लीला
वपुर्धरास्तथा ॥ २८ ॥ प्रादुर्बभूवुःसहसाचिंतितास्तेनशंभुना ॥ तेषांनामानितद्वच्मिशृणुष्वत्वंमहाधन ॥ २९ ॥ श्रीरागःप्रथमःपुत्र
ईश्वरस्यविमोहनः ॥ आसांचकेश्वपुमध्येपरब्रह्मप्रदायकः ॥ ३० ॥ तन्मध्याच्चैवमाहेशात्समुद्भूतोगणोत्तमः ॥ द्वितीयस्त्वथवसंतो
मूलादिदशान्महायशाः ॥ ३१ ॥ महदकश्चभूतानांचक्राच्चैवविशुद्धतः ॥ पंचमस्तुतृतीयोभूत्सतोविश्वभूषणः ॥ ३२ ॥ महेश्वरहृ
दजातंचक्रंचैवमनाहतम् ॥ नासादेशात्समुद्भूतोभैरवोभैरवस्वयम् ॥ ३३ ॥ मणिपूरकनामदंचक्रंतद्धिविमुक्तिदम् ॥ पंचाशच्चतयाव
र्णाअकानामहेश्वरात् ॥ ३४ ॥ राशयोद्वादशैतयानक्षत्राणितथैवच ॥ स्वाधिष्ठानसमुद्भूताजमद्बीजसमन्विताः ॥ ३५ ॥ क्षणेन
वृद्धिमायातिनतोरेतःप्रवर्तते ॥ रेतसस्तुजगत्सूक्ष्मनदीशजमनेंद्रियम् ॥ ३६ ॥ आराधान्नमहात्म्यम्प्रधानदोनारायणोभवत् ॥ महेश व
क्षभःपुत्रोनीलोविष्णुपराक्रमः ॥ ३७ ॥ एतेमूर्तिधरारागाजाताभार्यासहायिनः ॥ भार्यास्तेषांसमुद्भूताःशिरोभागात्पिनाकिनः ॥
॥ ३८ ॥ षट्त्रिंशत्परिमाणेनततस्तास्त्वंनिशामय ॥ गौरीकोलाहलीधीराद्राविडीमालकौशिकी ॥ ३९ ॥ षष्ठीस्याद्देवगांधारीश्रीरागस्य
प्रियाइमाः ॥ आंदोलाकौशिकीचैवतथाचरममंजरी ॥ ४० ॥ गडगिरीदेवशाखारामगिरीवसंतजा ॥ त्रिगुणास्तप्रतीयांचआहिरीकुकु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 मातथा॥४१॥वैराटीसामवेरीचषट्भार्याःपंचमेमताः॥भैरवीगुर्जरीचैवभाषावेलांगुलीतथा॥४२॥कर्णाटकीरक्तहंसाषट्भार्याभैर
वानुगाः॥बंगालीमधुराचैवकामोदाचाक्षिनारिका॥४३॥देवगिरीचदेवालीमेघरागइमानुगाः॥चोटकीमोटकीचैवनरांदुबीतथैव
च॥४४॥मल्हारीसिंधुमल्हारीनिटनारायणानुगाः॥एताहिंगिरिशंनत्वामहेशश्चमहेश्वरीम्॥४५॥स्वमूर्तिवाहनोपेताःस्वभ
र्तृस्वहितास्थिताः॥ब्रह्मामृदंगवाद्येनतोषयामासशंकरम्॥४६॥चतुरक्षरवाद्येनसवाद्यंचाकरोत्पुनः॥तालक्रियामहेशा
यदर्शयामासकेशवः॥४७॥वायवस्तत्रवाद्यंचचक्रुःसुस्वरमोजसा॥महेंद्रोवंशवाद्यंचसगिरिसुस्वरंबहु॥४८॥वन्हिःशूर्पर
वंचक्रेघणकंचतथाश्विनौ॥उपांगवादनंचक्रुःसामाःसूर्यःसमंततः॥४९॥घंटानांवादनंचक्रुर्गणाःशतसहस्रशः॥मुनीश्वराः
स्तथादेवाःपार्वतीसहितास्तथा॥५०॥स्वर्णभद्रासनेधृत्वाउपविश्याव्यलोकयन् शृंगाणांवादनंचक्रुर्वसवःसमहोरगाः॥
५१॥भेरीध्वनिंतथासाध्यावाद्यान्यन्येसुरोत्तमाः॥झर्झरीगोमुखादीनिसाध्याश्चक्रुर्महोत्सवे॥५२॥तंत्रीलयसमायुक्ताःगंधर्वा
मधुरस्वराः॥सुवर्णशृंगनादंचचक्रुःसिद्धाःसमंततः॥५३॥ततस्तुभगवानासीन्महानटवपुर्धरः॥मुकुटाःपंचशीर्षेतुप
न्नगैरुपशोभितः॥५४॥जटाविमुच्यसकलाभस्मोद्धूलितविग्रहः॥बाहुभिर्दशभिर्युक्तोहारकेयूरसंयुतः॥५५॥त्रैलोक्य
व्यापकंरूपंसूर्यकोटिसमप्रभम्॥कृत्वाननर्तभगवान्भास्करसमहानगे॥५६॥ततवीणादिकवाद्यंकांस्यतालादिकंघनम्॥
वंशादिकंतुवादित्रंतामरादिचनामकम्॥५७॥चतुर्विधंततोवाद्यंतुमुलंसमजायत॥तालगानापदहादेनाहस्तकानांतथैवच॥ २५
॥५८॥मानानांचैवतानानांमत्यक्षरूपेमवभौ॥सुकंठसुस्वरंमुक्तंसुगंभीरंमहास्वनम्॥५९॥विश्वावसुर्नारदश्चतुंबरुश्चै

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वगायकाः॥जगुर्गंधर्वपतयो ऽप्सराश्चमधुरस्वराः॥ ६०॥ ग्रामत्रयसमोपेतंस्वरसप्तकसंयुतम्॥दिव्यंसुछंदसांकल्प्यंतत्रगेय
मवर्तत॥ ६१॥ पर्वतोऽपिमहानादंहरपादतलाहतः॥ऊर्मीभिर्भ्रमयस्तत्रमहीसधुरकानना॥ ६२॥हस्तैकाश्चतुराशीतिंस
ससर्जतदाशिवः॥ललाटफलकस्वेदात्सूतमागधबंदिन ६३महेशहृदयाज्जातागंधर्वाविश्वगायिनः॥तेमूर्तादेवदेवस्यस्फुरंगा
लयसंयुताः॥ ६४॥प्रेक्षकाणांमृगीणांचचकुराश्चयमोजसा॥किंनराःपुष्पवर्षाणिससृजुःस्वैर्गुणैरिह॥ ६५॥एवंचतुर्षुमासे
षुयदानृत्यमजायत॥अतिक्रांतशरज्जातानिर्मलाकाशशोभिता॥ ६६॥पद्मखंडसमाच्छन्नसरोवरसुखांबुजा॥फलवृक्षौष
धीभिश्चकिंचित्पांडुसुखच्छविः॥ ६७॥ऊर्जशुक्लचतुर्दश्यांप्रसन्नागिरिजातया॥समाप्तव्रतचर्यःसईश्वरोऽपितदाबभौ॥ ६८
॥साचोवाचतदाशंभुंविकचस्वरलोचना॥विमर्शोपमोधितंचयदालिंगंभविष्यति॥ ६९॥नर्मदाजलसंभूतंविश्वपूज्यंभविष्यति
॥एवमुक्तास्ततःस्कंधाहरस्तोत्रंचकारह॥ ७०॥नमस्तेदेवदेवायमहादेवायमौलिने॥जगत्धात्रेसवित्रेचशंकरायशिवायच॥ ७१
कपर्दिनेजपादायब्रह्मगर्भायतेनमः॥हिरण्यरेतसेतुभ्यंनीलग्रीवायतेनमः॥ ७२॥नमोब्रह्मण्यदेवायसितभूतिधरायच॥
पंचवक्त्रायरूपायनिरूपायनमोनमः॥ ७३॥सहस्राक्षायशर्वायनमस्तेकृत्तिवाससे॥अंधकासुरमोक्षायपशूनांपतयेनमः॥
७४॥विप्रवह्निमुखायाग्रायहरायचभवायच॥शंकरायमहेशायईश्वरायनमोनमः॥ ७५॥अमूर्तब्रह्मरूपायमूर्तानांभावनायच॥
नमःशिवायचोग्रायहरायचभवायच॥ ७६॥नमःकृष्णायशर्वायत्रिपुरांतकहारिणे॥अघोरायनमस्तेस्तुनमस्तेपुरुषायते॥ ७७
॥सद्योजातायतुभ्यंभोवामदेवायतेनमः॥ईशानायनमस्तुभ्यंपंचास्यायकपालिने॥ ७८॥विरूपाक्षायभावायभगनेत्रनिपा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

मा·मा· तिने ॥ पूषदंतनिपातायमहायज्ञनिपातिने ॥ ७९ ॥ मृगव्याधायधर्मायकालचक्रायचक्रिणे ॥ महापुरुषपूज्यायगणानांपतये मा·अ·
२५ नमः ॥ ८० ॥ गंगाधरायमृडायभवानीप्रियकारिणे ॥ जगदानंददात्रेचब्रह्मरूपायतेनमः ॥ ८१ ॥ गुणातीतायगुणिनेसूक्ष्मायगुरवेपिच
नमोमहत्स्वरूपायभस्मनाजवकारिणे ॥ ८२ ॥ वैराग्यरूपिणेनित्ययोगाचार्यायवैनमः ॥ मयोक्तमाप्रसदेवस्मरसंहारकारक ॥ ८३
॥ क्षंतुमर्हसिविश्वेशशिरसात्वांप्रसादये ॥ शापानुग्रहएवैषःकृतस्तेनैवसंशयः ॥ ८४ ॥ ममापराधजामन्युनकार्योभवतानघ ॥
एवंप्रसादितःशंभुर्दक्षस्तथात्रिदशैःसह ॥ तीर्णव्रतपरानंदनिर्भरःप्राहतांमुमाम् ॥ ८५ ॥ यइमांमत्कृतिंभक्त्यापठिष्यतितवाकृता
म् ॥ तस्यचेष्टावियोगश्चनभविष्यतिपार्वति ॥ ८६ ॥ जन्मत्रयंधनैर्युक्तःसर्वव्याधिविवर्जितः ॥ इहवर्षविविधान्भोगान्नतयास्यति
मत्पुर ॥ ८७ ॥ इत्युक्त्वातांमहेशोपिस्वस्थंगमद्ददौततः ॥ वैष्णवंवामभागंसाप्रतिजग्राहपार्वती ॥ ८८ ॥ शंखकपालहस्तंचयथोवाधेगर-
लम्बितं ॥ रुंडमालांदहारंचसितगौरंसमंततः ॥ ८९ ॥ ब्रह्मांडकोटिजनकजटाभिर्भूषितशिरः ॥ सितद्युतिकलाखंडरत्नभासावभा
सितम् ॥ ९० ॥ स्वर्णाभरणसंयुक्तमेकतोभुजगांगदम् ॥ एकतःकृत्तिवसनमन्यतःपट्टकूलवत् ॥ ९१ ॥ मत्स्यवाहनसंयुक्तमन्य
तोवृषभांकितम् ॥ एकतःपार्षतैःसेव्यमन्यतःसखिसेवितम् ॥ ९२ ॥ रूपमेवंविधंदृष्ट्वाब्रह्माद्यादेवतागणाः ॥ तुष्टुवुःपरयाभ-
क्त्यातेजोभूषितलोचनम् ॥ ९३ ॥ त्वमेकोभगवान्सर्वव्यापकःसर्वदेहिनः ॥ पितृवद्रक्षकोसित्वंमातात्वंजीवसंज्ञकः ॥ ९४ ॥ साक्षी
विश्वस्यबीजत्वंब्रह्मांडवशकारकः ॥ उत्पद्यंतेविलीयंतेत्वयिब्रह्मांडकोटयः ॥ ९५ ॥ ऊर्मयःसागरेनित्यंसलिलेबुद्बुदायथा ॥ अहं २५
कदाचित्तेनेत्वाकदाचित्तवभालतः ॥ ९६ ॥ क्वचित्सर्गोशिवाद्देवात्प्रादुर्भूत्वासृजेजगत् ॥ तवाज्ञाकारिणःसर्वेवयंब्रह्मादयःसुराः ९७

CC-0. In Public Domain. Digitization by eGangotri

अनंतवैभवोऽनंतोऽनंतधामास्यनंतकः ॥ अनंतः सर्वभंगाय कुरु षे रूपमद्भुतम् ॥ ९८ ॥ भवानिलं भयं नित्यमशिवानां पवित्रकृत् ॥
शिवानामपिदात्री त्वं तपसामपि त्वं फलम् ॥ ९९ ॥ यः शिवः सः स्वयं विष्णुर्यो विष्णुः स सदाशिवः ॥ इत्यभेदमतिजाता स्वत्स्वान-
त्वत्प्रसादतः ॥ १०० ॥ यत्किंचिज्जगत्यस्मिन्दृश्यते श्रूयतेपि वा ॥ मध्ये बहिश्च तत्सर्वं त्रयं व्याप्य स्थिता यदा ॥ १०१ ॥ जगत्पूज्य स्फुर
ज्ञानजगद्वंद्यतथांबिके ॥ प्रसादं कुरु देवशि देवेश प्रणता वयम् ॥ १०२ ॥ इत्युक्त्वा त्रिदशाः सर्वे हृष्टा जग्मुर्यथागतम् ॥ ॥ गालव उवा
च ॥ ॥ नैविद्यमेतदखिलं सुधियो मनुष्याः संसारसागरसमुत्तरणैकपोतम् ॥ संचिंत्य यांति मनसा हृतकिल्बिषास्ते ब्रह्मस्वरूपमनुयां
ति विमुक्तसंगाः ॥ १०३ ॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये हरतांडवनर्तनं नाम द्वाविंशोऽध्यायः
॥ २२ ॥ ॥ गालव उवाच ॥ ॥ एवं तु लब्धशापाश्च पार्वतीशापपीडिता ॥ अनयत्या बभूवुश्च नद्याश्च प्रतिमानवाः ॥ १ ॥ शालग्रा
मस्तु गंडक्यां नर्मदायां महेश्वरः ॥ उत्पद्यते स्वयंभूश्च तावेतौ नैव कृत्रिमौ ॥ २ ॥ चतुर्विंशतिभेदेन शालग्रामगतो हरिः ॥ परी
क्ष्य पुरुषो नित्यमेकरूपः सदाशिवः ॥ ३ ॥ शालिग्रामशिला यत्र गंडकीविमले जले ॥ तत्र स्नात्वा च पीत्वा च ब्रह्मणः पदमाप्नुयात्
॥ ४ ॥ तां पूजयित्वा विधिवद्गंडकीसंभवां शिलाम् ॥ योगीश्वरो विबुद्धात्मा जायते नात्र संशयः ॥ ५ ॥ एतत्ते कथितं सर्वं यत्पृष्टो ह
मिह त्वया ॥ यथा हरो विप्रशापप्राप्तवांस्तन्निशामय ॥ ६ ॥ यः शृणोति नरो भक्त्या वाच्यमानामिमां कथाम् ॥ गिरीशं नित्यसंवा
धामुमादेहार्द्धवर्णिताम् ॥ ७ ॥ ब्रह्मणस्तु तिसंयुक्तां स गच्छेत्परमां गतिम् ॥ श्लोकार्धं श्लोकपादं वा समस्तं श्लोकमेव वा ॥ यः पठेद
विरोधेन मायामोह विवर्जितः ॥ ८ ॥ स याति परमं स्थानं यत्र गत्वा न शोचति ॥ ९ ॥ चातुर्मास्ये विशेषेण पठन् शृण्वन्नरोत्तमाः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चा·मा लभंतेचिंतितांसिद्धिंधनपुत्रादिसंवृताः ॥ १० ॥ यथाब्रह्मादयोदेवागीतवाद्याभियोगतः ॥ परांसिद्धिमवापुस्तेदुर्गांशिवसम्प्री मा·अ
२६ पूतः ॥ ११ ॥ वर्षाकालेचसंप्राप्तेभक्तियोगजनार्दने ॥ महेश्वरेयदुर्गायांनभूयस्तनपोभवेत् ॥ १२ ॥ गणेशस्यसदाकुर्याच्चातुर्मास्य २३
विशेषतः ॥ पूजांमनुष्यालाभार्थयतोलाभप्रदोहिसः ॥ १३ ॥ सूर्योनिरोगतांदद्यादृत्युस्थायः पूजयेत्सदाचातुर्मास्येसमायातेवि
शेषफलदोनृणाम् ॥ १४ ॥ इदंहिपंचायतनंसव्यतंगृहमेधिभिः ॥ चातुर्मास्यविशेषेणसेवितंचिंतितप्रदं ॥ १५ ॥ शालग्रामगत
विष्णुंयः पूजयतिनित्यदा ॥ द्वारवतीचक्रशीलासहितंमोक्षदायकम् ॥ १६ ॥ चातुर्मास्येविशेषेणदर्शनाद्भुक्तिमुक्तिदम् ॥ यस्मिन्
स्तुतेस्तुतंसर्वंपूजितेपूजितंजगत् ॥ १७ ॥ पूजितः पठितोध्यातः स्मृतोवैकलुषापहः ॥ शालग्रामंकिंपुनर्यच्छालग्रामगतोहरिः ॥
१८ ॥ पुनर्हरनैवेद्यंफलंचापिधृतंजलम् ॥ चातुर्मास्येविशेषेणशालिग्रामगतंशुभम् ॥ १९ ॥ तिलाःपुनंतिसकलंशालिग्राम
स्यशूद्रजं ॥ चातुर्मास्येविशेषेणनरंभक्त्यासमन्वितम् ॥ २० ॥ सलक्ष्मीसहितोनित्यंधनधान्यसमन्वितः ॥ महाभाग्यवशाद्गृहेज
यतेनात्रसंशयः ॥ २१ ॥ सलक्ष्मीसहितोविष्णुर्विज्ञेयोमात्रसंशयः ॥ तंपूजयन्महाभक्त्यास्थिरालक्ष्मीर्गृहेभवेत् ॥ २२ ॥ तावद्दूरि
द्रतालोकेतावद्भ्रजतिपातकम् ॥ नावत्क्लेशाःशरीरेस्मिन्नयावत्प्रियतेहरिम् ॥ २३ ॥ सएवपूज्यतेयत्रपंचक्रोशंपवित्रकम् ॥ क
रोतिसकलक्षेत्रंनतत्राःशुभसंभवः ॥ २४ ॥ एतदेवमहाभाग्यमेतदेवमहातपः ॥ एषएवपरोमोक्षोयत्रलक्ष्मीशपूजनम् ॥ २५
॥ शंखश्चदक्षिणावर्तोलक्ष्मीनारायणात्मकः ॥ तुलसीकृष्णसारांत्रयत्रद्वारवतीशिला ॥ २६ ॥ तत्रश्रीर्विजयोविष्णुर्मुक्तिरेवच २६
तुष्टयम् ॥ लक्ष्मीनारायणेपूजांविधातुर्मनुजस्यतु ॥ २७ ॥ ददातिपुण्यमतुलंमुक्तोभवातितत्क्षणात् ॥ चातुर्मास्येविशेषेणपू

CC-0. In Public Domain. Digitization by eGangotri

ज्योलक्ष्मीसुतोहरिः ॥ २८ ॥ कुर्वतस्तस्यदेवस्य ध्यानंकल्मषनाशनम् ॥ तुलसीमंजरीभिश्चपूजितोजन्मनाशनः ॥ २९ ॥ पू-
जितोबिल्वपत्रेणचातुर्मास्येघ त्वत्तमः ॥ ३० ॥ सर्वमयत्नेनसएवसेव्योयोव्याप्यविश्वजगतामधीशः ॥ कालेसृजत्यत्तिचहेल
यावातप्राप्यभक्तोनहिसीदतीति ॥ ३१ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्ये लक्ष्मीनारायणमाहिमावर्ण
ननामत्रयोविंशोऽध्यायः ॥ २३ ॥ ॥ गालवउवाच ॥ ॥ एकदाभगवान्रुद्रः कैलासशिखरस्थितः ॥ दधारपरमालक्ष्मीमुमया
सहितः किल ॥ १ ॥ गणानांकोटयस्तिस्रस्तयदापर्यवारयन् ॥ वीरबाहुर्वीरभद्रोवीरसेनश्चभृंगिराट् ॥ २ ॥ रुचिरस्तंडिस्तथानंदी
पुष्पदंतस्तथोल्कटः ॥ विकटः कंटकश्चैवहरः केशोविघटकः ॥ ३ ॥ मालाधरःपाशधरःसृगोंचनरनस्तथा ॥ भुण्योल्कदः शालि
भद्रोमहाभद्रोविभद्रकः ॥ ४ ॥ कणपः कालपः कालोधनपोरक्तलोचनः ॥ विकटास्योभद्रकश्च दीर्घजिह्वोविरोचनः ॥ ५ ॥ पार
दोघनदोध्वांक्षीहसकोनरकस्तथा ॥ पंचशीर्षस्त्रिशीर्षश्चक्रोडदंष्ट्रोमहाद्भुतः ॥ ६ ॥ सिंहवक्त्रोवृषहनुः प्रचंडस्तंडिरेवच ॥ एते
चान्येचबहवस्तदाभवसमीपगाः ॥ ७ ॥ महादेवजयेत्युच्चभद्रकालीसम न्वितं ॥ भूतप्रेतपिशाचानांसमूहायस्यवल्लभाः ॥
८ ॥ अस्त्कवस्तसमीपस्थावसंतेसमुपागते ॥ वनराजिर्विभातिस्मनवकोरकशोभिता ॥ ९ ॥ दक्षिणानिलसंस्पर्शः कवीनांस्र
रवकृद्भो ॥ वियोगिहृदयाकर्षीकिंशुकः पुष्पशोभितः ॥ १० ॥ हृद्यानिविक्रियाभावंचिक्रीडुश्चसमंततः ॥ तस्मिन्विगाढसमये
मनस्युन्मादकंतथा ॥ ११ ॥ नंदीदंडधरःसज्ञांदृष्ट्वाचक्रेहरोपरः ॥ अलंचापलदोषेणातपःकुर्वंतुभोगणाः ॥ १२ ॥ तदासर्ववनम
पिमूकांडजमभूत्पुनः ॥ गणास्ततपआतस्थुर्दृष्ट्वाकांतिंवसतजाम् ॥ १३ ॥ ततःसाविश्वजननीपार्वतीप्राहशंकरम् ॥ ईयेतेक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रगानित्यमक्षमालामहेश्वर ॥ १४ ॥ त्वयाकिंजप्यतेदेवसंदेहयतिमेमनः ॥ त्वमेकःसर्वभूतानामादिकर्त्तासकलेश्वरः ॥ १५
॥ नमातानपिताबंधुस्तवजातिर्नकश्चन ॥ अहंतवपरंकिंचिद्दृश्यन्नास्तीतिकिंचन ॥ १६ ॥ श्रमेणत्वंसमायुक्तोश्वासोच्छ्वासपरा
यणः ॥ जपन्नपिमहाभक्त्यादृश्यतेत्वंमयासदा ॥ १७ ॥ त्वत्तःपरतरंकिंचिद्यत्त्वंध्यायसिचेतसा ॥ तन्मेकथयदेवेशयद्यहंद-
यितातव ॥ १८ ॥ इतिपृष्टस्तदाशंभुरुवाचहरिसेवकः ॥ हरेर्नामसहस्राणांसारंध्यायामिनित्यशः ॥ १९ ॥ जपामिरामनामाक
मवतारससप्तमम् ॥ चतुर्विंशतिसंख्याकान्प्रादुर्भावान्हरेर्गुणान् ॥ २० ॥ एतेषामपियत्सारंप्रणवाख्यमहत्फलम् ॥ द्वादशाक्षर
संयुक्तंब्रह्मरूपंसनातनम् ॥ २१ ॥ अक्षरत्रयसंबद्धंप्रमात्रयसमन्वितम् ॥ सबिंदुंप्रणवंशुद्धंजपामिजपमालया ॥ २२ ॥ वेदसा
रमिदंनित्यंह्यक्षरंसततोद्यतम् ॥ निर्मलंह्यमृतंशांतंसद्रूपममृतोपमम् ॥ २३ ॥ कलातीतंनिर्वंशगनिर्व्यापारंमहत्परं ॥ विश्वाधारं
जगन्मध्यंकोटिब्रह्मांडबीजकम् ॥ २४ ॥ जडंशून्यंक्रियंवापिनिरंजननियामकम् ॥ यज्ज्ञात्वामुच्यतेक्षिप्रंघोरसंसारबंधनात् ॥
२५ ॥ ओंकारसहितंयच्चद्वादशाक्षरबीजकम् ॥ जपतःपापकोटीनांदावाग्निस्त्वंप्रजायते ॥ २६ ॥ एतदेवपरंगुह्यमेतदेवपरंमहः
॥ एतद्धिदुर्लभंलोकेत्रैलोक्यस्यविभूषणं ॥ २७ ॥ प्राप्यतेजन्मकोटीभिःशुभाशुभविनाशकम् ॥ एतदेवपरंज्ञानंद्वादशाक्षरचिंत
नम् ॥ २८ ॥ चातुर्मास्येविशेषेणअस्मदाचिंतितंपदम् ॥ एतदक्षरजंस्तोत्रंयःसमाश्रयतेसदा ॥ २९ ॥ मनसाकर्मणावाचातस्यना
स्तिपुनर्भवः ॥ द्वादशाक्षरसंयुक्तंचक्रंद्वादशभूषितम् ॥ ३० ॥ मासद्वादशनामानिविष्णोर्येभक्तितत्पराः ॥ शालग्रामेस्तुतान् २७
स्कृत्वान्यसेदव्यहराहिसः ॥ ३१ ॥ दिवसेदिवसेनस्यद्वादशाहफलंलभेत् ॥ द्वादशाक्षरमाहात्म्यंवर्णितुंनैवशक्यते ॥ ३२ ॥ जि

CC-0. In Public Domain. Digitization by eGangotri

ल्पासहस्रैरपिचब्रह्मणापिनपार्यते ॥ महामंत्रोह्ययंलोकेजप्योध्यातःस्तुतस्तथा ॥ ३३ ॥पापहासर्वमासेषुचातुर्मास्येविशे
षतः ॥इदंरहस्यंवेदानांपुराणानामनेकशः ॥ ३४ ॥स्मृतीनामपिसर्वासांद्वादशाक्षरचिंतनम् ॥ चिंतनादेवमर्त्यानांसिद्धिर्भवति
हीशिता ॥ ३५ ॥पुण्यदानेनयास्येनमुक्तिर्भवतिशाश्वती ॥ वर्णैस्तथाश्रमैरेवप्रणवेनसमन्वितैः ॥ ३६ ॥जपेध्यानैःशमपूर्वैर्मोक्षमा
प्यतेनिश्चितं ॥ शूद्राणांचापिनारीणांप्रणवेनविवर्जितः ॥ ३७ ॥प्रकृतीनांचसर्वासांमंत्रोद्वादशाक्षरः ॥नजपोनतपःकार्यंकायक्ले-
शाद्विसंस्थिता ॥ ३८ ॥ विप्रभक्त्याचदानेनविष्णुध्यानेनसिध्यति ॥ नासामंत्रोरामनामध्ययूःकोट्याधिकंभवेत् ॥ ३९ ॥रामेतिद्व्य
क्षरजपःसर्वपापापनोदकः ॥ गच्छन्तिष्ठन्शयानोवामनुजोरामकीर्तनात् ॥ ४० ॥इहनिर्वर्ततेयातिप्रांतेहरिगणोभवेत् ॥रामेति
द्व्यक्षरोमंत्रोमंत्रकोटिशताधिकः ॥ ४१ ॥सर्वासांप्रकृतीनांचकथितःपापनाशकः ॥ चातुर्मास्येथसंप्राप्तेसोप्यनंतफलप्रदः ॥ ४२ ॥
चातुर्मास्येमहापुण्यंलभ्यतेभक्तितत्परैः ॥देवबल्मिष्कलंतेषांयमलोकस्यसेवनम् ॥ ४३ ॥नरामादधिकंकिंचित्पठनंजगतीतले ॥रा
मनाममाश्रयायैवनतेषांयमयातना ॥ ४४ ॥येचदोषाविघ्नकराःसूतकाविग्रहाश्चये ॥रामनाम्नैवविलयंयांतिनात्रविचारणा ॥ ४५
॥रमतेसर्वभूतेषुस्थावरेषुचरेषुच ॥अंतरात्मास्वरूपेणयच्चरामेतिकथ्यते ॥ ४६ ॥रामेतिमंत्रराजोऽयंभयव्याधिनिषूदकः ॥रणेविज
यदश्चापिसर्वकार्यार्थसाधकः ॥ ४७ ॥सर्वतीर्थफलप्रोक्तोविप्राणामपिकामदः ॥रामचंद्रेतिरामेतिरामेतिसमुदाहृतः ॥ ४८ ॥द्व्यक्ष
रोमंत्रराजोयंसर्वकार्यकरोभुवि ॥ देवाअपिप्रगायंतिरामनामगुणाकरम् ॥ ४९ ॥तस्मात्त्वमपिदेवेशिरामनामसदावद ॥ रामनामज
पेद्योवैमुच्यतेसर्वकिल्बिषैः ॥ ५० ॥सहस्रनामजंपुण्यंरामनाम्नैवजायते ॥चातुर्मास्येविशेषेणतत्पुण्यंदशधोत्तरम् ॥ ५१ ॥दाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चा.मा. जातिप्रजातानांमहद्दह्यतिपातकम् ॥ रामांह्ययंविश्वमिदंसमग्रंस्वतेजसाव्याप्यजनांतरात्मना ॥ पुनातिजन्मांतरपातकान् मा.भ.
२९ निस्थूलानिसूक्ष्माणिक्षणाद्धदग्ध्वा ॥५२॥ ॥इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येद्वादशाक्षरमहिमा २५
वर्णनंनामचतुर्विंशोऽध्यायः ॥२४॥ ॥पार्वत्युवाच॥ ॥द्वादशाक्षरमाहात्म्यममविस्तरतोवद ॥यथावर्णयत्फलंचयथाच
क्रियतेमया ॥१॥ ॥श्रीमहादेवउवाच॥ ॥द्विजातीनांसहोंकारःसहितोद्वादशाक्षरः ॥स्त्रीशूद्राणांनमस्कार पूर्वकःसमुदा
हृतः ॥२॥प्रकृतीनांरामनामसमतोवाषडक्षरः ॥सोपिप्रणवहीनःस्यात्पुराणस्मृतिनिर्णयः ॥३॥क्रमोऽयसर्ववर्णानांप्रकृतीनांसे-
देवहि ॥क्रमेणरहितायस्तुकरोतिमनुजोजप ॥४॥तस्यप्रकुप्यतिविभुर्नरकादिप्रदायकः॥ ॥पार्वत्युवाच॥ ॥मयात्रिमात्रयास्वा
मिन्सेव्यतेजगदीश्वरः॥५॥रूपमस्यकथंजानेवचसामप्यगोचरं॥ ॥ईश्वरउवाच॥ ॥प्रणवस्याऽधिकारोनतवा स्त्रिवरवर्णिनि
॥नमोभगवतेवासुदेवायेतिजपःसदा॥६॥ ॥पार्वत्युवाच॥ ॥यदिसप्रणवंदद्याद्द्वादशाक्षरचिंतनम् ॥प्रणवेनाधिकारोमेकथंभ
वतिधूर्जटे ॥७॥ ॥ईश्वरउवाच॥ ॥प्रणवःसर्ववेदानामादिरेषःप्रकीर्तितः ॥ब्रह्माविष्णुशिवश्चैववसंतिदयितायुताः ॥८॥तत्रस
र्वाणिभूतानिसर्वतीर्थानिभागशः ॥तिष्ठतिसर्वतीर्थानिकैवल्यंब्रह्मएवयः ॥९॥तस्ययोग्यायदादीक्षाचरिष्यसियदातपः ॥चातु
र्मास्येहरिप्रीत्यैकरिष्यसिशुभानने ॥१०॥तपसाप्राप्यतेकामस्तपसाचमहत्फलम् ॥तपसाजायतेसर्वंतत्तपःफलभेनरैः ॥११॥य
शःसौभाग्यमतुलंक्षमासत्यादयोगुणाः फलभं तपसानित्यंतपस्त्यक्तुंनशक्यते ॥१२॥यदाहितपसावृद्धिस्तदाभक्तिर्हरौभवेत् ॥तदा २८
हितपसोहानिर्यदाभक्तिविनाकृतम् ॥१३॥तावत्तपांसिगर्जंतिदेहेऽस्मिन्सततंनृणाम् ॥यदाविष्णुस्मरंन्नित्यंजिह्वाग्रपावनंभवेत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ १४ ॥ यथाप्रदीपे ज्वलिते प्रणश्यति महत्तमः ॥ तथा हरेः कथायां च याति पापमनेकधा ॥ १५ ॥ तस्मात्सर्वात्मना यत्नेन हरौ स्नेहं
परं कुरु ॥ चातुर्मास्ये विशेषेण भावेन समन्वितं ॥ १६ ॥ विशुद्धहृदया भूत्वा मन्त्रराजमिमं जप ॥ स एव भगवान्कृष्णो द्वादशाक्षरसंयु
तः ॥ १७ ॥ प्रदास्यति परं ज्ञानं ब्रह्मरूपमखंडितम् ॥ ब्रह्मकल्पान्तकोटीषु स्थापितं द्वादशाक्षरम् ॥ १८ ॥ मन्त्रराजं स्वप्रणवं ध्यायन्सोऽपि
न पश्यति ॥ इत्युक्त्वा सा तपोनिष्ठा तपश्चरितुमागता ॥ १९ ॥ हिमाचलस्य शिखरं चातुर्मास्ये समागते ॥ ब्रह्मचर्यव्रतपरा वसनं त्रयसंयु
ता ॥ २० ॥ प्रातर्मध्ये पराह्णे च ध्यायामि हरिशंकरम् ॥ वपुषैव पुरा कृष्णपूजने शंकरस्य च ॥ २१ ॥ सर्वे जनसमायुक्ता पितुः शृंगमनो
हरे ॥ अतपत्सा विशालाक्षी क्षमादिगुणसंयुता ॥ २२ ॥ ॥ गालव उवाच ॥ ॥ या हि योगेश्वरी ध्येया या या विद्याविश्ववंदिता ॥ जननी या च
विश्वस्य सा पिकामा तपो गता ॥ २४ ॥ या हि प्रकृतिसद्रूपा तडित्कोटिसमप्रभा ॥ विरजायास्त्वयं वंद्यागुणातीता च रत्नप ॥
२५ ॥ पृथ्व्यंबु तेजो वायुश्च गगनं यन्मयं विदुः ॥ मूलप्रकृतिरूपाया सा चकारान्तमं तपः ॥ २६ ॥ या स्थावरजंगममाश्रु विश्वव्या
प्यास्थिता या प्रकृतेः पुरापि ॥ स्मृह्यादिरूपेण च तृप्तिदात्री देवस्य कृत्ते तपसा पशुह्निम् ॥ २७ ॥ ॥ इति श्रीस्कंदपुराणे ब्रह्मनार
दसंवादे चातुर्मास्यमाहात्म्ये पार्वतीतपोवर्णनं नाम पंचविंशोऽध्यायः ॥ २५ ॥ ॥ गालव उवाच ॥ ॥ प्रवृत्तायां शैलपुत्र्यां महत्तपसि
दारुणे ॥ कंदर्पेण पराभूतो विचचार महीं हरः ॥ १ ॥ वृक्षच्छायासु तीर्थेषु नदीषु च नदेषु च ॥ जलेन सिंचन्स्ववपुः सर्वत्रापि महेश्वरः
॥ २ ॥ नयाति कामाकुलितो नलेभे शर्म कर्हिचित ॥ एकदा यमुनां दृष्ट्वा जलकल्लोलमालिनीम् ॥ ३ ॥ विगाहितुं मनश्चक्रे तापातिश
मयान्वित ॥ कृष्णा बभूव तन्नीरं हरकायाग्निवह्निना ॥ ४ ॥ दग्धविगाहनेनाशु मर्षप्रायं सदा बभौ ॥ सापि दिव्यवपुः पूर्वं श्यामा भूत्वा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चा·मा हराधृतः ॥ ५ ॥ स्तुत्वानत्वामहेशानमुधाचपुनरेवसा ॥ प्रसादंकुरुदेवेशवशगास्मिसदातव ॥ ६ ॥ ॥ ईश्वरउवाच ॥ ॥ अस्मि मा·अ·
२९ न्तीर्थवरेपुण्येयः स्नास्यतिनरोभुवि ॥ तस्यपापसहस्राणियास्यन्तिविलयंध्रुवम् ॥ ७ ॥ हरितीर्थमितिख्यातंपुण्यंलोकेभवि २५
ष्यति ॥ इत्युक्त्वातांप्रणम्याथतत्रैवान्तरधीयत ॥ ८ ॥ तस्यास्तौ रेमहेशोऽपिकृत्वारूपंमनोहरम् ॥ कामालयंवाद्यहस्तंकुन्तमुकुटंजटा
धरम् ॥ ९ ॥ स्वेच्छयामुनिगेहेषुदर्शयत्यंगचापलम् ॥ क्वचिद्गायतिगीतानिक्वचिन्नृत्यतिछंदतः ॥ १० ॥ सचकूर्द्यतिहसतिस्त्री
णांमध्यगतःक्वचित् ॥ एवंविचरतस्तस्यऋषिपत्न्यःसमंततः ॥ ११ ॥ पत्युःशुश्रूषणंगेहकार्याण्यपिचतत्क्षणात् ॥ तमेवमनसा
चक्रुःप्रतिरूपेणमोहिताः ॥ १२ ॥ त्यक्त्वासर्वेवहास्यानिचक्रुस्ताअपियोषितः ॥ ततस्तेमुनयोदृष्ट्वातासांदुःशीलभावनाम् ॥
१३ ॥ चक्रुर्धुमुनयःसर्वरूपेतस्यमनोहरम् ॥ गृह्यतांहन्यतामेषकोऽयंदुष्टउपागतः ॥ १४ ॥ इतितंगृह्यकाष्ठानियष्टीश्चस्यस्ययुस्त
दा ॥ पलायितःसबहुधाभयात्तेषांमहात्मनाम् ॥ १५ ॥ योजीवकलयाविश्वंप्राप्यतिपातिदेहिनाम् ॥ नज्ञायतेनचध्यानेभ्रधश्चा
पिजायते ॥ १६ ॥ नशेकुस्तेयदासर्वेगृहीतुंतंमहेश्वरम् ॥ तदाशिवंप्रकुपिताःशेपुरित्थंद्विजातयः ॥ १७ ॥ यस्माल्लिंगार्थमागत्य
त्वाश्रमाश्चोरवत्कृतम् ॥ परदारापहरणेतल्लिंगंपततांभुवि ॥ १८ ॥ सद्यएवहिशापंत्वदृष्ट्वाप्राहुस्तेतापसाः ॥ एवमुक्तेसशापाग्निर्वि
ज्वरूपधरोमहान् ॥ १९ ॥ तल्लिंगंधूर्जटेश्छित्वापातयामासभूतले ॥ रुधिरौघपरव्याप्तोमुमोहभगवान्भुवि ॥ २० ॥ वेदनातोज्व
लद्वपुर्महाशापाग्निभूतधीः ॥ ततस्थापतितंदृष्ट्वानआजग्मुर्महर्षयः ॥ २१ ॥ आकाशेसर्वभूतानित्रेसुर्विश्वंचचालह ॥ देवाश्च २९
व्याकुलाजातामहाभयमुपागताः ॥ २२ ॥ ज्ञात्वाविमामहेशानंपीडितास्तेहृदयंभवन् ॥ शुश्रुशुःशदुःखार्तादेवाहिवलवत्तरे ॥ २३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥किंकृतंभगवानेषदेवैरपिससेव्यते॥साक्षीसर्वस्यजगतोह्यस्माभिर्नोपलक्षितः॥२४॥वयंमूढधियःपापापरसज्ज्ञानदुर्ब-
लाः॥कथमस्माभिर्यस्यात्माश्रुतश्चननिवेदितः॥२५॥मयेदृशोगृहस्थायआत्मायननिवेदितः॥निर्विकारोनिर्विषयोनिरीहानिरुप
द्रवः॥२६॥निर्गमोनिरहंकारोयःशम्भुर्नोपलक्षितः॥यस्यकामाइमेसर्वदेहेतिष्ठंतिमध्यमाः॥२७॥सएवजगतास्वामीह-
रोऽस्माभिर्नवीक्षितः॥इत्युक्त्वास्तेह्युपार्श्वस्थायावत्तत्रसमागताः॥२८॥स्तान्दृष्ट्वासहसास्तत्रपुनरेवमहेश्वरः॥विप्रशापभया
न्नष्टस्त्रिपुरारिर्दिवययो॥२९॥स्करभिर्गीचलोकेतातुष्टावस्कसंयुतः॥सृष्टिस्थितिविनाशानांकर्त्र्यैमात्रेनमोनमः॥३०॥या
त्वंरसमयेभूम्यांवरूपायातिभूतलम्॥देवानांचतथासंघानृपितॄणामपिवगणान्॥३१॥सर्वज्ञात्वारसाभिज्ञामधुरास्वाददायिनी॥
त्वयाविश्वमिदंसर्वबलस्नेहसमन्वितम्॥३२॥त्वंमातासर्वरुद्राणांवसूनांदुहितातथा॥आदित्यानांस्वसाचैवतुष्टावाछितसि-
द्धिदा॥३३॥त्वंधृतिस्त्वंतथापुष्टिस्त्वंस्वाहात्वंस्वधातथा॥ऋद्धिःसिद्धिस्तथालक्ष्मीर्धृतिःकीर्तिस्तथामतिः॥३४॥कान्ति-
र्लज्जामहामायाश्रद्धासर्वार्थसाधिनी॥त्वयाविरहितंकिंचिन्नास्मिंस्त्रिभुवनेष्वपि॥३५॥वन्हेस्तृप्तिप्रदात्वंवदेवादीनांचतृ
प्तिदा॥त्वयासर्वमिदंव्याप्तंजगत्स्थावरजंगमम्॥३६॥पादास्तेवेदाश्चत्वारःसमुद्रास्तेनतोयधुः॥चंद्रार्कौलोचनेयस्यारोमाग्रेषु
चदेवताः॥३७॥शृंगयोःपर्वताःसर्वेकर्णयोर्वायवस्तथा॥नाभ्यांचैवामृतंदेवीपातालानिखुरेस्तथा॥३८॥स्कंधेचभगवान्
ब्रह्मामस्तकस्थःसदाशिवः॥हृद्देशेचस्थितोविष्णुःपुच्छाग्रेपन्नगास्तथा॥३९॥शकृत्स्थावसवःसर्वेसाध्यामूत्रस्थितास्तव॥
सर्वयज्ञाह्यस्थिदेशेकिनरागुह्यसंस्थिताः॥४०॥पितॄणांचगणाःसर्वेपुरस्थाभातिसर्वदा॥सर्वयक्षाभालदेशेकिन्नराश्चकप-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चा॰ मा॰ लयोः ॥ ५१ ॥ सर्वदेवमयी त्वं हि सर्वभूतविवृद्धिदा ॥ सर्वलोकहितानित्यं मम देहाहिताभव ॥ ५२ ॥ प्रणतस्तववदे वेशिपूजेयं मा॰ अ॰
३० त्वासदानघे ॥ स्तोमि विश्वार्तिहन्त्री त्वा प्रसन्ना वरदा भव ॥ ५३ ॥ विप्रशापाग्निना दग्धशरीर मम शोभने ॥ स्वतेजसा पुनः कर्तुमर्हस्य- २६
मृतसंभवे ॥ ५४ ॥ इत्युक्त्वा तां परिक्रम्य तस्या देहे लयं गतः ॥ सापि गर्भदधारा यु स्फुरभिस्तदनंतरम् ॥ ५५ ॥ कालातिक्रमयोगेन
सर्वव्याकुलतां ययौ ॥ तस्मिन् प्रनष्टे देवेशे विप्रशापभयावृते ॥ ५६ ॥ देवा महार्तिभययुक्षचाल पृथिवी तथा ॥ चन्द्रार्कौ निष्प्रभौ चो
ववायुरुच्चंड एव च ॥ ५७ ॥ समुद्राः क्षोभमगमंस्तस्मिन्काले द्विजोत्तमः ॥ ५८ ॥ यस्मिन् जगत्स्थावरजंगमादिकं काले लयं-
प्राप्य पुनः प्ररोहति ॥ यस्मिन्प्रनष्टे द्विजशापपीडिते जगद्गतप्रायमवर्तत क्षणात् ॥ ५९ ॥ ॥ इति श्रीस्कन्दपुराणे ब्रह्मनारद
संवादे चातुर्मास्यमाहात्म्ये हरशापो नाम षड्विंशोऽध्यायः ॥ २६ ॥ ॥ गालव उवाच ॥ ॥ तस्मिंस्तत्क्षणे ते लिंगे योजनायामवि-
विस्तृते ॥ विषादार्ता ऋषिगणास्तत्र जग्मुः सहस्रशः ॥ १ ॥ व्यलोकयंत सर्वत्र दृष्ट्वा तन्न महेश्वरम् ॥ नासौ दृष्टिपथे तेषां बभूव भ-
यविह्वलः ॥ २ ॥ वीर्यं वर्षसहस्रं च बहून्यपि सुसंचितम् ॥ पृथिवीं सकलां व्याप्य स्थितं ददृशिरे द्विजाः ॥ ३ ॥ तद्दृष्ट्वा सुमहल्लिं-
गं रुधिराक्तं जलैः प्लुतम् ॥ ब्राह्मणाः संशयगता दृह्यमानां वसुंधराम् ॥ ४ ॥ तल्लिंगं तत्र संस्थाप्य चक्रुस्तां नर्मदां नदीम् ॥ तत्
जलं नर्मदारूपं तल्लिंगं मरकंटकम् ॥ ५ ॥ नरकं वारयत्येतत्सेवितं नरकापहम् ॥ भूतग्रहाश्च सर्वेऽपि यास्यंतीति विलयं ध्रुवम् ॥ ६ ॥ तत्र
स्नात्वा जलं पीत्वा संतर्प्य च पितॄंस्तथा ॥ सर्वान्कामानवाप्नोति मनुष्यो भुवि दुर्लभान् ॥ ७ ॥ लिंगानि नार्मदेयानि पूजयिष्यंति ये न- ३०
राः ॥ ते वै रुद्रमया देहो भविष्यंति न संशयः ॥ ८ ॥ चातुर्मास्ये विशेषेण लिंगपूजा महाफला ॥ चातुर्मास्ये रुद्रजयं हरपूजा शिवे रतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥९॥ पंचामृतंनस्नपनंनतेषांगर्भवेदना ॥ येकरिष्यंतिमधुनासेचनंलिंगमस्तके ॥१०॥ तेषांदुःखसहस्राणियास्यंतिविलयंध्रु
वम् ॥ दीपदानंकृतंयेनचातुर्मास्येशिवाग्रतः ॥ ११ ॥ कुलकोटिसमुद्धृत्यस्वेच्छयाशिवलोकभाक् ॥ चंदनागरुधूपैश्चक्षतैःकु
ंकुमैरपि ॥ १२ ॥ नर्मदाजललिंगंयेह्यर्चयिष्यंतितेशिवाः ॥ ग्रावाहरत्वमापन्नःप्राणिनामपिकाकथा ॥ १३ ॥ नर्मदोद्भूतंमहालिंगं
जलधारणसंयुतम् ॥ पूजयित्वाविधानेनचातुर्मास्येशिवोभवेत् ॥ १४ ॥ चातुर्मास्येयेमनुजानर्मदामरकंटके ॥ तीर्थस्नास्यंतितेनि
यतास्तेषांवासस्त्रिविष्टपे ॥१५ ॥ ॥ब्रह्मोवाच ॥ ॥इत्युक्त्वातेद्विजास्तत्रस्थाप्यलिंगंयथाविधि ॥ मरकंटकतीर्थेचनर्मदांच
महानदीं ॥ १६ ॥ पुनश्चिंतांपराजातांविश्वस्यक्षोभकारणे ॥ पद्मासनगताभूत्वाप्राणायामपरायणाः ॥ १७ ॥ चिंतयामासुःक
स्थयद्धृदयस्यमहेश्वरम् ॥ ततोदेवोमहेद्वद्यःसमाप्यमरकंटकम् ॥ १८ ॥ ब्राह्मणाश्चस्तुतिंचक्रुर्विनयानतकंधराः ॥ न-
मोस्तुधाद्विजातिभ्योब्रह्मविष्णुमहेश्वराः ॥१९ ॥ भूसुरेभ्योगुरुभ्यश्चविमुक्तेभ्यश्चबंधनात् ॥ यूयंगुणत्रयातीतागुणरूपागु
णाकराः ॥ २० ॥ गुणत्रयमयैर्भावैःसततंप्राणबुद्बुदाः ॥ येषांवाक्यजलेनैवपापिष्ठाअपिशुद्धिताः ॥२१ ॥ प्रयांतिपापपुंजाश्च
स्वसत्याद्यतिपातिताः ॥ शस्त्रंलोहमयंयेषांवागेवस्तमंभिताः ॥ २२ ॥ पापैःपराभिभूतानांतेषांलोकोन्तरबलम् ॥ क्षमयापृथिवीतुल्या
कोपेवैश्वानरप्रभाः ॥ २३ ॥ पातनेनैकशक्तीनांसमर्थायूयमेवहि ॥ स्वर्गादीनांतथायानेभवंतागतयोध्रुवम् ॥ २ ॥ सत्कर्मकारका
श्चैवसत्कर्मनिरताःसदा ॥ सत्कर्मफलदातारःसत्कर्मभ्योमुमुक्षवः ॥ सावित्रीमंत्रनिरतायेभवंतोघनाशनाः ॥ आत्मानं
यजमानंचतारयंतिनसंशयः ॥ २४ ॥ वन्हयश्चतथाविप्रास्तर्पिताःकार्यसाधकाः ॥ चातुर्मास्यविशेषेणतेषांपूजामहाफ-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ला ॥२७॥ कोपितासर्वदेहस्यनाशनायभवंतिहि ॥ तावन्नवज्रमिंद्रस्यशूलंचैवपिनाकिनः ॥ २८ ॥ दंडोयमस्यतावन्नोया
वच्छापोद्विजोद्भवः ॥ अग्निनाज्वाल्यतेदृश्यंशापोहिष्टानापिस्वयम् ॥ २९ ॥ हंतिजातानजातांश्चतस्माद्विप्रंनकोपयेत् ॥
विप्रकोपाग्निनादग्धानरकान्नैवमुच्यते ॥ ३० ॥ शस्त्रक्षताःपिनरकान्मुच्यंतेनात्रसंशयः ॥ देवानामधुधान्यानांसामर्थ्यंभेदनंनः
हि ॥ ३१ ॥ वाङ्मात्रेणाहिविप्रस्याविद्यंतेसकलंजगत् ॥ तेयूयंगुरवोऽस्माकंविश्वकारणकारकाः ॥ ३२ ॥ प्रसादपरमानित्यंभव
तुम्कवनेश्वराः ॥ ईश्वरेणाविनासर्वेवयंलोकाश्चदुःखिताः ॥ ३३ ॥ तत्कथ्यतांसभगवान्कुत्रास्तेपरमेश्वरः ॥ ॥गालवउवाच॥
ज्ञात्वामुनिभयत्रस्तंदेवेशंशूलपाणिनं ॥ ३४ ॥ सुरभीगर्भसंभूतंदेवानूचुर्महर्षयः ॥ स्वागतंदेवदेवेभ्योज्ञातोवैसमहेश्वरः ॥
३५ ॥ तत्रगच्छतुदेवेशायत्रदेवःसनातनः ॥ इत्युक्त्वातेमहात्मानःसहदेवैर्युगस्तदा ॥ ३६ ॥ गोलोकंदेवमार्गेणयत्रपायसकर्द
मः ॥ घृतनद्योमधुह्रदानदीनाश्चत्रसंघशः ॥ ३७ ॥ पूर्वजानागणाःसर्वेदधिपीयूषपाणयः ॥ मरीचिपासोमपाश्चसिद्धसंघास्त
थापरे ॥ ३८ ॥ घृतपाश्चैवसाध्याश्चयत्रदेवाःसनातनाः ॥ तेतत्रगत्वामुनयोददृशुःसुरभीसुतम् ॥ ३९ ॥ तेजसाभास्करंचैवन
नीलनामेतिविश्रुतम् ॥ इतस्ततोऽभिधावंतंगवांसंघातमध्यगम् ॥ ५० ॥ नंदासुमनसाचैवसुरूपाचसुशीलका ॥ कामिनीनंदिनीचै
वमध्याचैवहिरण्यदा ॥ ४१ ॥ धनदाधर्मदाचैवनर्मदासकलप्रिया ॥ वामनालंबिकाकृष्णादीर्घशृंगासुपुच्छिका ॥ ४२ ॥ ताराचैव
तरेपिकाशांतादुर्विषह्यामनोरमा ॥ सुनासादीर्घनासाचगौरागौरमुखीहया ॥ ४३ ॥ हरिद्रवर्णानीलाचशंखिनीपंचवर्णिका ॥
विनताभिनताचैवभिन्नवर्णासुपत्रिका ॥ ४४ ॥ जयाऽरुणाचकुंडोघ्नीसुदंताचारुचंपिका ॥ एतासांमध्यगंनीलंदृष्ट्वातामुनिदेवताः

CC-0. In Public Domain. Digitization by eGangotri

॥ ४५ ॥ विचरंतिस्वरूपंतंसंजातंविस्मयन्मुखाः ॥ मुनीश्वराःकृपाविष्टाइंद्राद्याह्लृष्टमानसाः ४६ ॥ स्वकांतिभारैर्भिरेकर्तुंतेजसा-
त्तस्यतोषिताः ॥ ॥शूद्रउवाच॥ ॥कथंनीलेतिन्नामासौजातोऽयमद्भुताकृतिः ॥ ४७ ॥ किमस्तुवन्वसन्नास्तेब्राह्मणाविश्वका
रणम् ॥ ॥गालवउवाच॥ ॥लोहितोयस्तुवर्णेनमुखेपुच्छेचपांडुरः ॥ ४८ ॥श्वेतःखुरविषाणेषुसनीलोवृषभःस्मृतः ॥चतु-
ष्पादोधर्मरूपोनीलस्लोहितचिन्हकः ॥ ४९ ॥कपिलःखुरचिन्हेषुसनीलोवृषभ स्मृतः॥योसौमहेश्वरोदेवोवृषश्चापिसएवहि॥
॥५०॥चतुष्पादोधर्मरूपोनीलःपंचमुखोहरः ॥यस्यसंदर्शनाद्देववाजपेयफलंलभेत् ॥ ५१ ॥नीलेचपूजितेयस्मिन्पूजितंस-
कलंजगत् ॥स्निग्धग्रासप्रदानेनजगदाप्यायितंभवेत् ॥ ५२ ॥यस्यदेहःसदाश्रीमान्विश्वव्यापीजनार्दनः ॥ नित्यमर्चयतीया
सौवेदमंत्रैःसनातनैः॥५३॥ ॥ऋषयऊचुः ॥ ॥त्वंदेहःसर्वगोनृणांविश्वगोप्तासनातनः ॥ विप्रहर्ताज्ञानदश्चधर्मरूपस्त्वमास्प
दः॥ ५४ ॥त्वमेवधनदःश्रीदःसर्वव्याधिनिषूदनः ॥ जगतांशर्मकरणप्रवृत्तःकनकप्रदः ॥५५ ॥तेजसाधामसर्वेषांसारभेयम
हाबल ॥ शृंगाग्रेधृतकैलासःपार्वतीसहितस्तव॥ ५६ ॥ वेदस्कंधोवेदमयावेदात्मावेदवित्तमः ॥ वेदवेद्योवेदधानोवेदरूपागुणा
करः ॥५७॥गुणात्रयेभ्यःपिपरीयथात्म्यवेदकस्तव ॥वृषस्त्वंभगवान्देवयस्तेपापंकुरुतेत्वघम् ॥ ५८ ॥ वृषलःसतुविज्ञेयोरौ
रवादिषुपच्यते ॥पदास्पृष्टःसतुनरान्नरकादिषुयातनाः ॥५९ ॥ स्पृश्यतेपापानिचयोनैगादभ्रायबंधनैः ॥ स्वत्सामचतुःषष्ठ्यांतंम
हाभारसमन्वितम् ॥ ६० ॥निर्दयायेप्रशोष्यंतिमूर्तिस्तेषानशाश्वती ॥ चतुर्भिःसहितंमत्यांविवाहविधिनातुये ॥ ६१ ॥विवाहनी
लरूपस्ययेकरिष्यंतिमानवाः ॥ पितृन्नुद्दिश्यतेषांवैकुलेनैवास्तिनारकी ॥ ६२ ॥त्वंगतिःसर्वलोकानांत्वंपितापरमेश्वरः ॥ त्वयावि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चा॰मा॰ नाजगत्सर्वं तत्क्षणादेव नश्यति ॥ ६३ ॥ पराचैव तु पश्यंती मध्यमा वैखरी तथा ॥ चतुर्विधानां च सामीश्वरं त्वां विदुर्बुधाः ॥ ६४ ॥ मा॰अ॰
३२ चतुःशृंगश्चतुष्पाद्द्विशीर्षः सप्तहस्तकम् ॥ त्रिधाबद्धं धर्ममयं त्वामेव वृषभं विदुः ॥ ६५ ॥ तृप्तिदं सर्वभूतानां विश्वव्यापकमोजसा ॥ २१
ब्रह्मधर्ममयं नित्यं त्वामात्मानं विदुर्जनाः ॥ ६६ ॥ अच्छेद्यस्त्वमभेद्यस्त्वमप्रमेयो महायशाः ॥ अशोष्यस्त्वमदाह्योऽसि विदुः पौरा-
णिका जनाः ॥ ६७ ॥ त्वदाधारमिदं सर्वं त्वदाधारमिदं जगत् ॥ त्वदाधाराश्च देवाश्च त्वदाधारं त्वयाऽमृतम् ॥ ६८ ॥ जीवरूपेण लोका-
स्त्रीन्व्याप्य तिष्ठसि नित्यदा ॥ एवं संस्तुतो नीलो विप्रैस्तैः सोमपायिभिः ॥ ६९ ॥ प्रसन्नवदनो भूत्वा विप्रान्प्राणतितत्परः ॥ पुनरेव
वचः प्रोचुर्विप्राः कृतशिवागसः ॥ ७० ॥ वरदं तु महेशस्य नीलरूपस्य धर्मतः ॥ एकादशाहे प्रेतस्य यस्य नोत्सृज्यते वृषः ॥ ७१ ॥ प्रेत-
त्वं तस्य स्थिरं तस्य दत्तैः श्राद्धशतैरपि ॥ पुनरेवं सकंपं तं दृष्ट्वा नीलं महावृषम् ॥ ७२ ॥ स्वल्पक्रोधसमाविष्टं द्विजाश्चक्रुस्तमंकितं ॥ च-
क्रं च वामभागे तु शूलं पार्श्वे तु दक्षिणे ॥ ७३ ॥ उत्सृज्य गवां मध्ये तं देवं गोपितं तदा ॥ ततो देवगणाः सर्वे महर्षीणां गणाः पुनः ॥ स्वा-
नि स्थानानि ते जग्मुर्मुनयो वीतमत्सराः ॥ ७४ ॥ एवमृषीणां दारेषु तासक्तः कामार्तचित्तो मुनिपुंगवानाम् ॥ शापं समासाद्य शि-
वोऽपि भक्त्या रेवाजलेऽगात्स शिलामयत्वम् ॥ ७५ ॥ ॥ इति श्रीस्कन्दपुराणे ब्रह्मनारदसंवादे चातुर्मास्यमाहात्म्ये पैजवनोपा-
ख्याने वृषस्तुतिर्नाम सप्तविंशोऽध्यायः ॥ २७ ॥ ॥ गालव उवाच ॥ ॥ इति ते कथितं सर्वं शालग्रामकथानकम् ॥ महेश्वरस्य चोत्प-
त्तिर्यथा लिंगत्वमाप सः ॥ १ ॥ तस्माद्धरो लिंगरूपं शालग्रामगतं हरिम् ॥ येऽर्चयंति नरा भक्त्या न तेषां दुःखयातनाः ॥ २ ॥ चातुर्मास्ये ३२
समायाते विशेषात्पूजयेच्च तौ ॥ अर्चितौ यावभेदेन स्वर्गमोक्षप्रदायकौ ॥ ३ ॥ देवौ हरिहरौ भक्त्या विप्रवह्निगवां गती ॥ ये चर्चयंति मा-

CC-0. In Public Domain. Digitization by eGangotri

हाशूद्रतेषां मोक्षप्रदोहरिः ॥ ४ ॥ वेदोक्तंकारयेत्कर्म पूर्तेष्टेवेदतत्परः ॥ पंचायतनपूजांचसत्यवादोह्यलोकृता ॥ ५ ॥ विवेकादि-
गुणैर्युक्तःसशूद्रोयातिसद्गतिम् ॥ ब्रह्मचर्यंतपोनान्यद्द्वादशाक्षरचिंतनात् ॥ ६ ॥ मंत्रैर्विनाषोडश चोपचारैः कार्यास्तुपूजानरका
दिह्नुः ॥ तथातथार्थेगिरिजापतेश्चकार्याहिसच्छूद्रमहाघमूर्त्री ॥ ७ ॥ ॥ ब्रह्मोवाच ॥ ॥ एवंकथयतोरेषारजनीक्षयमाययौसच्छूद्रोग
लव श्रीवशिष्ठेश्चपरिवारितः ॥ ८ ॥ सतेनपूजितोविप्रोययौशीघ्रंनिजाश्रमम् ॥ ९ ॥ यइमंशृणुयान्मर्त्योवाचयेत्पाठयेत्तथा ॥ श्लो
कंवासर्वमपिचतस्यपुण्यस्यशोनहि ॥ १० ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येपैजवनोपाख्यानेअष्टा
विंशोऽध्यायः ॥ २८ ॥ ॥ नारदउवाच ॥ ॥ कथंनित्याभगवत्तौहरपत्नीयशस्विनी ॥ योगसिद्धिंस्तुमहतीप्राप मासचतुष्टये ॥
१ ॥ मन्त्रराजमिमजप्त्वाद्वादशाक्षरसंभवम् ॥ एतन्मेविस्तरेणात्कथयस्वयथातथम् ॥ २ ॥ ॥ ब्रह्मोवाच ॥ ॥ चातुर्मास्येहरौ
सुप्तेपार्वतीनियमव्रता ॥ मनसाकर्मणावाचाहरिभक्तिपरायणा ॥ ३ ॥ चारुशृंगेपितुर्नित्यंतिष्ठतीतपसिस्थिता ॥ देवद्विजा-
ग्निगोश्वत्थानित्यपूजापरायणा ॥ ४ ॥ चातुर्मास्येत्रयस्साभासाविमलेहरिवासरे ॥ जजापपरममंत्रंयथादिष्टंपिनाकिना ॥ ५ ॥
शंखचक्रधरोविष्णुश्चतुर्हस्तःकिरीटधृक् ॥ मेघश्यामोंबुजाक्षश्चसूर्यकोटिसमप्रभः ॥ ६ ॥ गरुडाधिष्ठितोहृष्टोहसन्व्याप्यज-
गत्त्रयम् ॥ श्रीवत्सकौस्तुभयुतःपीतकौशेयवाससः ॥ ७ ॥ सर्वावरणभास्वोभिरभिदीप्तमहावपुः ॥ बभाषेपार्वतींविष्णुःप्रसन्न
वदनःशुभाम् ॥ देवितुष्टोस्मिभद्रंतेकथयस्वमभीप्सितम् ॥ ८ ॥ ॥ पार्वत्युवाच ॥ ॥ नेत्रज्ञानममलंदेहियेननावर्तनंभवेत् ॥ इ
त्युक्तःसमहाविष्णुःप्रत्युवाचहरप्रियाम् ॥ ९ सएवदेवदेवेशस्तवस्यत्यसंशयम् ॥ सएवभगवान्साक्षीदेहान्तरबहिःस्थितः ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥ १० ॥विश्वरूपस्त्वगोप्ताचपवित्राणांचपावनः ॥अनादिनिधनोधर्मोधर्मादीनांप्रभुर्हिसः॥ ११ ॥अक्षरत्रयसंबंधंयत्तत्सकलब्र
ह्मणवसः ॥ मूर्तामूर्तस्वरूपेणयोऽजोजन्मधरोहिसः ॥ १२ ॥ मयाधिकृतःसोनेवालिशकृतवनसंशयः ॥ इत्युक्त्वाभगवानीशो-
विररामप्रहृष्टवान् ॥ १३ ॥एतस्मिन्नन्तरेशंभुर्गिरिजाश्रममभ्ययात् ॥ सर्वभूतगणैर्युक्तोविमानेसार्वकामिके॥ १४ ॥ तयावैभगवा
न्देवःपूजितःपरमेश्वरः ॥सखीनामपिप्रत्यक्षमाश्चर्यंसमजायत ॥ १५ ॥स्कन्दाद्यास्तमहादेवंविष्णुर्देहलयंययौ ॥अथोवाचमहेशा
नःपार्वतींजगदीश्वरः॥ १६ ॥ विमानवरमारुह्यतुष्टाऽहंतवसुव्रते ॥ गत्वैकांतप्रदेशंतुकथयेपरममहः ॥ १७॥ एवमुक्त्वाभगवतीं
करेगृह्यमुदान्वितः ॥विमानवरमारोप्यलीलयाप्रययौतदा ॥ १८ ॥ नानाधातुमयानद्रीन्नानारत्नविचित्रितान् ॥ नदीर्निर्झरकु
जांश्चनदान्कोकिलकूजितान् ॥ १९ ॥अखातादेवखाताश्चगंगाद्याःसरितस्तथा॥ सौगंधिकांश्चकल्हारान्सहस्रदलपिंजरान्॥
२० ॥दर्शयन्कर्णिकारांश्चकोविदांश्चमहाद्रुमान्॥ तालान्तमालान्हिंतालान्प्रियंगूत्पनसानपि॥ २१ ॥तिलकान्बकुलांश्चैवब-
हून्पिचुपुष्पितान् ॥ क्षेत्राणिकलनाम्नानिपिंजराणिविदर्शयन् ॥ २२ ॥ यथोदत्वनदीतीरेगतश्चारवर्णमहत् ॥कुल्लकाश्चस्वर्णमयश
रस्त्वबगणान्वितम् ॥ २३ ॥ हेमभूमिविभागस्तं वह्निकांतिमृगद्विजम् ॥ तमर्तीरगतानाचमुनीनामूर्ध्वरेतसा ॥ २४ ॥ आश्रमान्स-
विमानाग्रेनिषण्णस्तस्यैप्रदर्शयन् ॥ षट्कृत्तिकाश्चददृशेपार्वत्याश्चसन्निधौ॥ २५॥ ताःस्वलंकृताःषड्पत्न्यस्ताविरजांबराः ॥ऊचु
स्ताःयोजितकराःकेयंपुत्रायगम्यते ॥ २६ ॥ तत्कथ्यतांमहाभागेनचत्तेदर्शनंगतः ॥ २७ ॥ ॥पार्वत्युवाच॥ ॥ममभाग्यवशात्पुत्रः
कथमुत्संगमाहरेत् ॥ नह्यभाग्यवशात्पुंसांक्वापिसौख्यंनिरंतरं ॥ २८ ॥स्कन्दनाम्नाप्यहंहृष्टाभवतीनांचदर्शनात् ॥ किमर्थमिहसं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्राप्ता: कथ्यतामविलंबितम्॥ २९ ॥ ॥कृत्तिकाऊचुः॥ ॥वयंतवसुतंन्यस्तंप्रदातुमिहसुंदरि॥चातुर्मास्येरवौस्नातुमाग
तादेविनिम्नगात्॥ ३० ॥ ॥पार्वत्युवाच॥ ॥नहास्यावसरःसख्यःसत्यमेवाद्भिकथ्यताम्॥ एकांतावसरहास्यंजायतेचनर
तरं॥ ३१ ॥ कृत्तिकाऊचुः॥ ॥सत्यंवदामहेदेवित्रैलोक्यशुभाभिते॥अस्यस्त्वसमुद्भवस्यमध्यस्थबालकेवृणु॥ ३२ ॥ कृत्ति
कानांवचः श्रुत्वाशंकितापार्वतीतदा॥ददर्शबालंदीप्ताभंषण्मुखंदीप्तवर्चसं॥ तडित्कोटिप्रतीकाशरूपंदिव्यश्रियायुतम्॥
वन्हिपुत्रंचगांगेयंकार्तिकेयंमहाबलम्॥ ३४ ॥सावत्सेतिगृहीत्वातंकुमारंपाणिनामुदा॥विमानमध्यमादायकृत्वोत्संगेत्कवा
चह॥ ३५ ॥चिरंजीवचिरंनंदचिरंनंदयबांधवान्॥इत्युक्त्वागाढमालिंग्यमूर्ध्निचाघ्रायतंसुतम्॥ ३६ ॥ संहृष्टापरमादारक्तास्यः
दृष्टमानसम्॥कार्तिकेयोमहाप्रेम्णाप्राणपत्यमहेश्वरम्॥ ३७ ॥ततःप्रांजलिरव्यग्रप्रहृष्टेनांतरात्मना॥ तद्विमानययौशीघ्र
तीर्त्वानदनदीपतीन्॥ ३८ ॥जंबुद्वीपमतिक्रम्यलक्षयोजनमायतम्॥ ततःसमुद्रंद्विगुणंलवणादतयेवच३९उत्तराश्चकुरून्नी-
त्वाविमानेनार्कःतेजसा॥समुद्रंद्विगुणंद्वीपंकुशनामेतिकीर्तितम्॥ ४० ॥ दिव्यलोकसमाक्रान्तंदिव्यपर्वतसंकुलम्॥ इक्षू
दाद्विगुणंद्वीपतद्वीपाद्विगुणःपुनः॥ ४१ ॥तमतिक्रम्यतात्सिंधोर्द्विगुणःक्रौंचसंज्ञितम्॥ ततोपिद्विगुणःसिंधुःसुरोदायक्षसे-
वितः॥ ४२॥ ततोऽपिद्विगुणंद्वीपंशाकद्वीपेतिसंज्ञितम्॥अपांधेर्द्विगुणंतस्मादाज्यरूपंसुनिर्मितम्॥ ४३ ॥परमेस्वादसंपू
र्णेयत्रसिद्धाःसमंततः॥तस्माच्चद्विगुणंद्वीपंशाल्मलीवृक्षसंज्ञितम्॥ ४४ ॥समुद्रोद्विगुणस्तत्रदधिमंडलसंप्रभः॥साध्याश्च
संतिनियतंमहत्तपसिसंस्थिताः॥ ४५ ॥ततोपिद्विगुणंद्वीपंप्लक्षनामेतिविश्रुतम्॥ क्षीरोदाद्विगुणस्तत्रयत्रयत्रमहर्षयः॥ ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ॥ षडिमानिस्कंदिव्यानिभौमःस्वर्गउदाहृतः ॥ तत्रस्वर्णमयीभूमि तयारजतसंयुता ॥ ४७ ॥ हृतामधुफलस्वादैःसर्वकामप्रदा
 यका ॥ यत्रस्त्रीपुरुषाणांचकल्पदक्षाग्रहस्थिताः ॥ ४८ ॥ वासांसिभूषणानान्नसमूहानहर्षदंतिच ॥ एतानिदक्षाश्चिन्हानिद्वीपानि
मुनिसत्तम ॥ ४९ ॥ महेश्वरोविमानेनन्यतिक्रामद्विहायसा ॥ सूक्ष्मंद्वीपस्यचप्रातर्द्विगुणःक्षीरसागरः ॥ ५० ॥ तन्मध्येएकमहद्वीपं-
श्वेतनामएकनिश्चितम् ॥ रम्यकःपर्वतस्तत्रशतशृंगोपमद्रुमः ॥ ५१ ॥ तस्यशृंगेमहादिव्येविमानस्थापितंतदा ॥ तदामृतफलैर्वृक्षैः
सेवितेहेमवालुके ॥ ५२ ॥ क्षीरक्षेदेनविहृतेशिलातलएकसंवृते ॥ विकेसवरएकभंगमणिरत्नसमन्विते ॥ ५३ ॥ उमायाःकथया
मासदेवदेवः पिनाकधृक् ॥ कार्तिकेयोपिशृण्वावयुह्याद्गुह्यतरमहत् ॥ ५४ ॥ ध्यानयोगमन्त्ररूपंद्वादशाक्षरसंज्ञितम् ॥ प्रणवे-
नयुतंसाग्रंसरहस्यंश्रुतेःपरम् ॥ ५५ ॥ ॥ ईश्वरउवाच ॥ ॥ अक्षरत्रयसंयुक्तोमंत्रोयंसकृदक्षरः ॥ माघमाससहितश्चायम-
मायाविश्वपावनः ॥ ५६ ॥ विष्णुगमोविष्णुमध्योमन्त्रत्रयसमन्वितः ॥ तुरीयकलयाशेषब्रह्मांडगणसेवितः ॥ ५७ ॥ निष्कामै
मुनिभिःसेव्योमहाविद्यादिसेवितः ॥ नाभितःशिरसिव्याप्तअखंडएकखदायकः ॥ ५८ ॥ ओंकारेतिप्रियाक्तिस्त्वंमहादुःख
विनाशिनः ॥ तंपूर्वंप्रणवंध्यात्वाज्ञानरूपंसुखाश्रयम् ॥ ५९ ॥ ज्ञात्वासर्वगतंब्रह्मदेहशोधनतत्परः ॥ पद्मासनपरोभूत्वासं
पूज्यज्ञानलोचनः ॥ ६० ॥ नेत्रेमुकुलितेकृत्वाकरौकृत्वातुसंहतौ ॥ चेतसिध्यानरूपेणचिंतयेच्छिवमंगलम् ॥ ६१ ॥ तडित्को
टिप्रतीकाशंसूर्यकोटिसमद्युतिं ॥ चंद्रलक्षसमच्छन्नंपुरुषंद्योतिताखिलम् ॥ ६२ ॥ मूर्तामूर्तंविराजंतंसद्रूपमव्ययम् ॥ चिं
तयित्वाविराड्रूपंनभूयस्तनपोभवेत् ॥ चातुर्मास्येसकृदपिध्यानात्कल्मषसंक्षयः ॥ ६३ ॥ एवंचमद्भुतमिदंसुरारेरमाधवी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

र्यं गुणतोऽप्यपारम् ॥ विलोकयेद्योऽघविनाशनाय क्षणं प्रभुर्जन्मशतोद्भवाय ॥ ६४ ॥ ॥ इतिश्रीस्कंदपुराणे ब्रह्मनारदसं-
वादे चातुर्मास्यमाहात्म्ये ध्यानयोगो नाम एकोनत्रिंशोऽध्यायः ॥ २९ ॥ ॥ पार्वत्युवाच ॥ ॥ ध्यानयोग महत्प्राप्य ज्ञानयोगम
वाप्नुयात् ॥ तथा कुरुष्व देवेश यथाहममरार्णवे ॥ १ ॥ ॥ ईश्वर उवाच ॥ ॥ प्रत्यक्षोऽयं मंत्रराजो द्वादशाक्षरसंज्ञितः ॥ जप्त
व्यः सनत्कुमाराद्यैर्वेदसारः सनातनः ॥ २ ॥ प्रणवः सर्ववेदाद्यः सर्वब्रह्मांडयाजकः ॥ प्रथमः सर्वकार्येषु सर्वसिद्धिप्रदाय-
कः ॥ ३ ॥ सितवर्णो मधुच्छंद ऋषिर्ब्रह्मा तु देवता ॥ परमात्मा तु गायत्री नियोगः सर्वकर्मसु ॥ ४ ॥ एतद्ब्रह्ममयं बीजं विश्वा-
मित्रसमन्वितम् ॥ वेदवेदांगतत्त्वाख्यं सदसद्रूपमव्ययम् ॥ ५ ॥ नकारः पीतवर्णस्तु जलबीजः सनातनः ॥ बीजं पृथ्वी मन-
श्छंदो विषहा विनियोगतः ॥ ६ ॥ मकारः पार्थिवं बीजं विश्वामित्रसमन्वितम् ॥ रक्तवर्णो महातेजा धनदानेन याजयेत् ॥ ७ ॥
उकारः पंचवर्णस्तु जलबीजः सनातनः ॥ मरीचिना समायुक्तः पूजितः सर्वभोगदः ॥ ८ ॥ भकारो हेमरक्ताभो भरद्वाजसमन्वि-
तः ॥ वायुबीजविनिर्मुक्तः कुर्वतामादिभोगदः ॥ ९ ॥ गकारः कुंदधवलो व्योमबीजं महाबलः ॥ ऋषिमंत्रपुरस्कृत्य योजितो मो-
क्षदायकः ॥ १० ॥ तेकारो विद्युदाकारः सामबीजं महत्स्मृतम् ॥ अंगिरा षट्कमूलं च वर्जितं कर्मकामिकं ॥ ११ ॥ वाकारो धूम्रवर्णा-
श्च सूर्यबीजं मनोजवम् ॥ पुलहर्षिसमायुक्तं नियुक्तं सर्वसौख्यदम् ॥ १२ ॥ सुकारस्वरूपोऽक्षरो नित्यं जपाकुसुमभास्वरः ॥ मनो-
बीजं दुर्विषहं पुलहाधिष्ठितमर्पदं ॥ १३ ॥ देकाराक्षरकं बीजं हंसरूपं च कर्वरम् ॥ सिद्धिबीजं महासत्त्वं क्रतुना तु नियोजितम् ॥
१४ ॥ वाकारो निर्मलो नित्यं यजमानस्तु बीजभृत् ॥ प्रचेताश्चियमाश्रयं मोक्षमोक्षप्रदायकम् ॥ १५ ॥ यकारस्य महाबीजपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

चा·मा· गवर्णश्वखेचरी ॥ भूचरीचमहासिद्धिः सर्वदाप्नुवचिंतनम् ॥ १६ ॥ भूगुयेभ्येसमाप्नोति नियोगेसर्वकर्मकृत् ॥ गायत्रीछंद मा·अ·
३५ ऐतेषांदेहन्यासक्रमोभवेत् ॥ १७ ॥ ओंकारंसर्वदान्यसेन्नकारंपादयोर्द्वयोः ॥ मोकारंगुह्यदेशेतुभकारंनाभिपंचके ॥ १८ ॥ ग ३०
कारंहृदयेन्यस्यवकारःकंठमध्यगः ॥ तेकारंदक्षिणेहस्तेवाकारे वामगस्तगः ॥ १९ ॥ सकारंमुखजिह्वायांदेकारःकर्णयोर्द्व
योः ॥ याकारःश्चक्षुरोर्द्वद्वयकारंमस्तकेन्यसेत् ॥ २० ॥ लिंगमुद्रायोनिमुद्राधेनुमुद्रातथात्रयं ॥ सकलंकृतमेतद्धिमंत्ररूपेषी
जाक्षरं ॥ २१ ॥ योजयेन्मत्स्यहृदविनसपापैःप्रलिप्यते ॥ एतद्द्वादश ॥ लिंगारक्कंमस्थद्वादशाक्षरम् ॥ २२ ॥ शालिग्रामशिलाचैव
द्वादशोवह्निपूजिताः ॥ ताभिःसहाकैरेभिःमत्स्यासैःसहसंयादे ॥ २३ ॥ यथावर्णमनुध्यानैर्मुनिर्बीजसमन्वितैः ॥ विनियोगेन
सहितैश्छंदोभिःसमलंकृतैः ॥ २४ ॥ ध्यानैर्जपैःपूजितैश्चभक्तानामुनिसत्तम ॥ मोक्षोभवतिबंधेभ्यःकर्मजेभ्योनसंशयः
॥ २५ ॥ अयंहिध्यानकर्माख्योयोगोदुःप्राप्यएवहि ॥ ध्यानयोगंपुनर्वक्ष्मिशृणुष्वैकाग्रमानसः ॥ २६ ॥ ध्यानयोगेनपापानां
क्षयोभवतिनान्यथा ॥ जपध्यानमयोयोगःकर्मयोगोनसंशयः ॥ २७ ॥ शब्दब्रह्मसमुद्भूतोवेदनद्वादशाक्षरः ॥ ध्यानेनसर्व-
माप्नोतिध्यानेनाप्नोतिशक्रताम् ॥ २८ ॥ ध्यानेनपरमंब्रह्ममूर्तौयोगस्तुध्यानजः ॥ सावलंबीध्यानयोगोयन्नारायणदर्शनं ॥
॥ २९ ॥ द्वितीयोनिखिलालंबोज्ञानयोगेनकीर्तितः ॥ अरूपमप्र॥यंयत्सर्वकायमहःसहा ॥ ३० ॥ तडित्कोटिसमप्रख्यंसदादि
तमरवंडितम् ॥ निष्फलंसकलंवापिनिरंजनमयंधियम् ॥ ३१ ॥ नस्वरूपंभोगरूपंतुयातीतिमणोपमं ॥ विश्रांतकरणंभूतमक्रांति- ३५
स्थंचशाश्वतं ॥ ३२ ॥ दृश्यादृश्यमजंचैववैरजंसंततोज्ज्वलं ॥ वह्निलंसर्वजंधर्म्यंनिर्विकल्पमनीश्वरम् ॥ ३३ ॥ अगोत्रंवरणंवापि

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मांडशतकारणम् ॥ निरीहं निर्मनो बुद्धिशून्यं रूपं च निर्मलम् ॥ ३४ ॥ तमीशरूपं निर्दिष्टं निर्द्वंद्वं साक्षिमात्रकम् ॥ शुद्धस्फटिक
संकाशं ध्यातृध्येयविवर्जितम् ॥ ३५ ॥ नोपमेयमगाधित्वं स्वीकुरु स्वस्वतेजसा ॥ ॥पार्वत्युवाच॥ ॥तत्कथं प्राप्यते सम्यग्ज्ञानयोगि
स्वरूपिणम् ॥ ३६ ॥ नारायणममूर्तं च स्थानं तस्य वद प्रभो ॥ ॥ईश्वर उवाच॥ ॥शिरः प्रधानं गात्रेषु शिरसा धार्यते महान् ॥ ३७ ॥ शिर
सा पूजितो देवः पूजितं सकलं जगत् ॥ शिरसा धार्यते योगः शिरस ाध्रियते बलम् ॥ ३८ ॥ शिरसा ध्रियते तेजो जीवितं शिरसि स्थि
तम् ॥ सूर्यः शिरो ह्यमूर्तस्य मूर्तस्यापि तथैव च ॥ ३९ ॥ उरस्तु पृ थिवीलोकः पादश्चैव रसातलम् ॥ अयं ब्रह्मांडरूपेण मूर्तामूर्तस्व
रूपतः ॥ ४० ॥ विष्णुरेव ब्रह्मरूपो ज्ञानयोगाश्रयः स्वयम् ॥ सृज ति सर्वभूतानि पालयत्यपि सर्वशः ॥ ४१ ॥ विनाशयति सर्वं हि
सर्वदेवमयो ह्ययम् ॥ सर्वमासेष्वाधिपत्यं यस्य विष्णोः सनातनम् ॥ ४२ ॥ तस्मात्सर्वेषु मासेषु सर्वेषु दिवसेष्वपि ॥ सर्वेषु यामका-
लेषु संस्मरन्मुच्यते हरिम् ॥ ४३ ॥ चातुर्मास्ये विशेषेण ध्यानम् त्रास्य मुच्यते ॥ अमूर्तसेवनं गंगातीर्थध्यानादूरं परम् ॥ ४४ ॥ स
र्वदानोत्तरं चैव चातुर्मास्ये न संशयः ॥ सर्वमासकृतं पापं चातुर्मा स्ये शुभाशुभम् ॥ ४५ ॥ अक्षय्यं तद्भवेद्देवि नात्र कार्या विचार-
णा ॥ तस्मात्सर्वप्रयत्नेन ज्ञानयोगो बहूत्तमः ॥ ४६ ॥ सेवितो वि ष्णुरूपेण ब्रह्ममोक्षप्रदायकः ॥ शृणुष्वावहिता भूत्वा मूर्तामूर्ते
स्थितिं शुभे ॥ ४७ ॥ न कथयं यस्य कस्य स्वकृतस्याप्यवशस्य च । अदातायाय दुष्टाय चलचित्ताय दांभिके ॥ ४८ ॥ स्ववाक्चुना
यनिंद्याय न वाच्या योगजा कथा ॥ नित्यभक्ताय दाताय शमादिगु णिने तथा ॥ ४९ ॥ विष्णुभक्ताय दातव्या शूद्रायापि द्विजन्मने
॥ अभक्तायाप्यशुचये येब्रह्मस्थानं न कथ्यते ॥ ५० ॥ मद्भक्त्याये ागासिद्धिं त्वं गृहाण शुभतपोधन ॥ अमूर्तज्ञानगम्यं तद्विद्धि ना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रायणंपरम् ॥ ५१ ॥ नादरूपेणशिरसितिष्ठंतंसर्वदेहिनाम् ॥ सएवजीवशिरसिवर्ततेसूर्यबिंबवत् ॥५२॥ सदोदितः सू-
क्ष्मरूपोमूर्तोमूर्त्यांमणीयते ॥ अभ्यासेनसदादेविप्राप्यतेपरमात्मकः ॥ ५३ ॥ शरीरेसकलादेवायोगिनोनिवसंतिहि ॥ कर्णेतु
दक्षिणेनद्यौनिवसंतितथापराः ॥ ५४ ॥ हृदयईश्वरःशंभुर्नाभौब्रह्मसनातनः ॥ पृथ्वीपादतलाग्रेतुजलंसर्वगतंतथा ॥ ५५ ॥
तेजोवायुस्तथाकाशंविध्यतेभालमध्यगः ॥ हस्तेचपंचतीर्थानिदक्षिणेनात्रसंशयः ॥ ५६ ॥ सूर्योयद्दक्षिणं नेत्रंचंद्रोवामसुदा
हृतम् ॥ भौमश्चैवबुधश्चैवनासिकेद्वेउदाहृते ॥ ५७ ॥ गुरुश्चदक्षिणेकर्णेवामकर्णेतथाभृगुः ॥ मुखेशनैश्चरःप्रोक्तोगुदेराहुःप्रकीर्ति
तः ॥ ५८ ॥ केतुरिंद्रियगःप्रोक्तोग्रहाः सर्वेशरीरगाः ॥ योगिनोदेहमासाद्यभुवनानिचतुर्दश ॥ ५९ ॥ प्रवर्ततेसदादेवीतस्माद्योगंस-
दाभ्यसेत् ॥ चातुर्मास्येविशेषेणयोगीपापंनिकृंतति ॥ ६० ॥ मूहूर्तमपियोयोगीमस्तकेधारयेन्मनः ॥ कर्णौपिधायपापेभ्योमुच्यतेसौ
नसंशयः ॥ ६१ ॥ अंतरंनैवपश्यामिविष्णोर्योगपरस्यवा ॥ एकोपियोगीयद्गेहेग्रासमात्रंभुनक्तिच ॥ ६२ ॥ कुलानित्रीणिसोवश्यंता
रयेद्वात्मनासह ॥ यदिविप्रोभवेद्योगीसोऽवश्यंदर्शनादपि ॥ ६३ ॥ सर्वेषांप्राणिनांदेविपापराशिनि दकः ॥ सत्क्रियोब्रह्मनिरतः
सच्छूद्रोयोग्यभाग्यदि ॥ ६४ ॥ भवेत्सद्गुरुभक्तोवासोप्यमूर्त्तफलंलभेत् ॥ योयोगीनियताहारःपरब्रह्मसमाधिमान् ॥ ६५ ॥ चा
तुर्मास्येविशेषेणहरौसलयभाग्भवेत् ॥ यथासिंदूररसस्पर्शाल्लोहंभवतिकांचनम् ॥ ६६ ॥ तथामूर्त्तंहरिंप्रीत्यामनुष्योलयमाव्रजेत्
॥ यथामार्गजलंगंगाप्राप्तंत्रिदशैरपि ॥ ६७ ॥ सेवितंसर्वफलदंतथायोगीविमुक्तिदः ॥ यथागोमयमात्रेणवन्हिर्दीप्यतिसर्वदा ॥ ६८ ॥
देवतानांमुखंतद्धिकीर्त्यतेयाज्ञिकैःसदा ॥ एवंयोगिसदाभ्यासाज्जायतेमोक्षभोगजम् ॥ ६९ ॥ योगोयंसेव्यतेदेविज्ञानसिद्धिप्रदः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदा॥ सनकादिभिराचार्यैर्मुमुक्षुभिरधीश्वरैः॥ ७०॥ प्रथमं ज्ञानसंपत्तिर्जायते योगिनां सदा॥ तेषां गृहीतमात्रस्तु योगी भवति
पार्वती॥ ७१॥ ततस्तु सिद्धयस्तस्य त्वणिमाद्याः पुरोगताः॥ भवंति तत्रापि मनो न दद्याद्योगिनां वरः॥ ७२॥ सर्वदानक्रतुभवपु-
ण्यं भवति योगतः॥ योगात्सकलकामाप्तिर्नयोगाद्वि प्राप्यते॥ ७३॥ योगान्महृदयग्रंथिर्नयोगान्ममतारिपुः॥ न योगसिद्धस्य मनो
हर्तुं केनापि शक्यते॥ ७४॥ स एव विमलो योगी यच्चित्तं शिरसि स्थितम्॥ स्थिरीभूतव्ययं नित्यं दशमद्वारसंपुटे॥ ७५॥ कर्णौ
पिधाय मर्त्यस्य नादरूपं विचिन्वतः॥ तदेव प्रणवस्याग्रे तदेव ब्रह्म शाश्वतम्॥ ७६॥ तदेवानंतरूपाख्यं तदेवामृतमुत्तमम्॥ घ्राणवायो
प्रघोषोयजठराग्नेर्महत्सदम्॥ ७७॥ पंचभूतविवासयज्ज्ञानरूपमिदं पदम्॥ पदं प्राप्य विमुक्तिः स्याज्जन्मसंसारबंधनात्॥ ७८॥ यदा
सिद्दुर्लभा लोके योगसिद्धिप्रदायका॥ ७९॥ एवं ब्रह्ममयं विभाति सकलं विश्वं चरस्थावरं विज्ञानाख्यमिदं पदं स भगवान्विष्णुः स्व-
यव्यापकः॥ ज्ञात्वा तं शिरसि स्थितं बहुवरं योगेश्वराणां परं प्राणी मुंचति सर्पवज्जगति जानिर्मोकमायाकृतिम्॥ ८०॥ ॥ इति श्री० ज्ञान
योगक० त्रिंशोऽध्यायः ३०॥ ॥ईश्वर उवाच॥ ॥यदा चित्तं मसकर्मत्यक्त्वा कर्मसु जायते॥ तदा ज्ञानमयो योगी जीवतां मोक्षदायकः॥ १
यदा निर्ममता देहे यदा चित्तं स्कनिर्मलम्॥ यदा हरौ भक्तियोगस्तदा बधो न कर्मणा २॥ कुर्वन्नेव हि कर्माणि मनः शांतं नृणां यदा॥ तदा योगम
यी सिद्धिर्जायते नात्र संशयः॥ ३॥ गुरुत्वं स्थानम[illegible]कृदनुभूय महामतिः॥ जीवन्विष्णुत्वमासाद्य कर्मसंगात्प्रमुच्यते॥ ४॥ कर्माणि नि-
त्यजातानि नित्यनैमित्तिकानि च॥ इच्छया नैव सेव्यानि दुःखतापविवृद्धये॥ ५॥ कर्मणामीशितारं च विष्णुं विद्धि महेश्वरी॥ तस्मिन्संतर्प्य
सर्वाणि संसारान्मुच्यते खिलात्॥ ६॥ एतदेव परं ज्ञानमेतदेव परं तपः॥ एतदेव परं श्रेयो यत्कृष्णे कर्म अर्पयेत्॥ ७॥ अयं हि निर्मलो योगो निर्गुणः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सउदाहृतः ॥ तद्विष्णोः कर्मजनितंशुभत्वप्रतिपादनम् ॥ ८ ॥ तावद्भ्रमंतिसंसारेपितरः पिंडतत्पराः ॥ यावत्कुलेभक्तियुतः सुतोनै
वप्रजायते ॥ ९ ॥ तावद्विजानिगर्जंतितावद्गर्जंतिपातकम् ॥ तावत्तीर्थान्यनेकानियावद्भक्तिंतुविंदति ॥ १० ॥ सएवज्ञानवांल्लोके
योगिनांप्रथमोहिसः ॥ महाक्रतुनामाहर्ताहरिभक्तियुतोहियः ॥ ११ ॥ निमिषंनिर्नयन्मेषंयोगःसमभिजायते ॥ वाणीजयेयोगिनस्तुगोमेधस्यप्र
कीर्तितः ॥ १२ ॥ मनसोविजयेनित्यमश्वमेधफलंलभेत् ॥ कल्पनाविजयान्नित्यंयज्ञसौत्रामणिंलभेत् ॥ १३ ॥ देहस्योत्सर्जनान्नि-
त्यंनरयज्ञः प्रकीर्तितः ॥ पंचेंद्रियपशून्हत्वानगोशीर्षंचकुंडले ॥ १४ ॥ गुरूपदेशविधिनाब्रह्मभूतत्वमश्नुते ॥ सयोगीनियताहारोदं
डश्रितप्रधारकः ॥ १५ ॥ त्रिदंडीसतुविज्ञेयोज्ञातंदेवनिरंजनं ॥ मनोदंडः कर्मदंडोवाग्दंडोयस्ययोगिनः ॥ १६ ॥ सयोगीब्रह्मरूपेण-
जीवन्नेवसमाप्यते ॥ अज्ञानीबाध्यतेनित्यंकर्मभिर्बंधनात्मकैः ॥ १७ ॥ कुर्वन्नेवाहिकर्माणिज्ञानिमुक्तिंप्रयातिही ॥
यदाहिगुरुणास्थानंब्रह्मणः प्रतिपादनम् ॥ १८ ॥ तदैक्यमुक्तिमाप्नोतिदेहास्तिष्ठतिकेवलं ॥ यावद्ब्रह्मफलावाप्त्यैप्रयाति
पुरुषोत्तमः ॥ १९ ॥ तावत्कर्ममयीवृत्तिर्ब्रह्मवृत्त्यंतराभवेत् ॥ अवांतराणिसर्वाणिज्ञेयानिमुनिभिः सदा ॥ २० ॥ मो-
क्षमार्गोद्विजाद्भिश्चश्रुतिस्मृतिसमुच्चयात् ॥ मोक्षोयंनगराकारश्चतुर्द्वारसमाकुलः ॥ २१ ॥ द्वारपालास्तथानित्यंचत्वार-
स्तुसमादयः ॥ तएवप्रथमंसेव्यामनुजैर्मोक्षदायकः ॥ २२ ॥ समश्चसद्विचारश्चसंतोषः साधुसंगमः ॥ एतैर्वैहस्तगायस्यत-
स्यासिद्धिर्नदूरतः ॥ २३ ॥ योगसिद्धिर्विष्णुभक्त्यासद्धर्माचरणेनच ॥ प्राप्यतेमनुजोदेविएतज्ज्ञानमलंविदुः ॥ २४
ज्ञानार्थंचप्रमन्मत्तोविद्यास्थानेषुसर्वशः ॥ सद्योज्ञानंसद्गुरुतोदीपार्चिरिवनिर्मलः ॥ २५ ॥ मुहूर्तमात्र-

CC-0. In Public Domain. Digitization by eGangotri

मपि लयंचितयतिध्रुवम् ॥ तस्यपापसहस्राणि विलयंयांतितत्क्षणात् ॥ रागद्वेषौपरित्यज्य क्रोधलोभविवर्जितः ॥ सर्व
त्रसमदर्शीचविष्णुभक्तस्यद ॥ २७ ॥ सर्वेषामपिजीवानां दयायस्यहृदिस्थिरा ॥ शौचाचारसमायुक्तो योगीदुःखनाविद
ति ॥ २८ ॥ मायादिपटलहीन ॥ चारविधिरागवान् ॥ कुसंसर्गविहीनश्च योगासिद्धश्चलक्षणम् ॥ २९ ॥ ममतावन्हि संयोगा
नराणांतापदायकः ॥ उत्पन्न शम नतस्ययोगीनाशांतचारणं ॥ ३० ॥ इंद्रियाणामयात्धृत्समनसैवैनिषेधयेत् ॥ यथालोहेनलो
हेचघोषितांतीक्ष्णतांव्रजेत् ॥ ३१ ॥ बुद्धिर्हि द्विविधादेवाहेया ग्राह्याविशफहृदा ॥ संसारविषयात्याज्यापरब्रह्मणिसाशुभा ॥ ३२ ॥ अ
हंकारोयथादेवीपापपुण्यप्रदाय कः ॥ जातेतत्वशफभफलक्कु तासंधायनान्यथा ॥ ३३ ॥ श्यामलचउपस्यचरूपार्ता तान्नराशिव ॥ ह
दिस्थशिरशिस्यच द्वयबद्धविमु क्तये ३४ ॥ एतदक्षरमव्यक्त ममृतंसकलंतव ॥ रूपरूपविष्णुरूपरूपरूपमूर्तीनि वेदित ॥ ३५
॥ एवंज्ञात्वाविमुच्येतयोगीसर र बंधनात् ॥ गुरूपदेशाद्रहस्यालभ्यतेनान्यथाक्वचित् ॥ ३६ ॥ यदागुरुः प्रसन्नात्मा त-
स्यविश्वंप्रसीदति ॥ गुरुध्वतो तोय नसंतुष्टापि तृदेवताः ॥ ३७ ॥ गुरुरूपदेशः मतिमासाद्विचारः समेमनः ॥ क्रियाच-
ज्ञानासहितामोक्षसिद्धिर्हिलक्ष म ॥ ३८ ॥ क्रियापतिर्विष्णुरेवस्वयमेवाहिनिष्क्रियः ॥ सचप्राणधिरूपाय द्वादशाक्षरबीजकः
॥ ३९ ॥ द्वादशाक्षरकंचक्र सर्वपापनि बर्हणं ॥ दुष्टानांदमनंचैवप रब्रह्मप्रदायकं ॥ ४० ॥ एतदेवपरब्रह्म द्वादशाक्षररूपधृक् ॥ मयाप्र
काशितंदेवीस्कंदाहिविमलंतव ॥ ४१ ॥ एत त्सारंयोगिनाध्यानरूपम्भक्तिर्ग्राह्यंमद्रूयान्नियत्न ॥ चातुर्मास्यजन्मकोट्यार्च जातंपा
पदग्ध्वामुक्तिदाकैटभारिः ॥ ४२ ॥ ॥ ब्रह्मोवाच ॥ ॥ एतस्मिन्नगरेतत्रक्षीरसागरमध्यतः ॥ उज्जहारविमानाग्र्यंतेजसा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

राभिपीडितः ॥ ४३ ॥ उरोबाहुतिंकुर्वन्नूसान्निध्यंसमुपागतः ॥ महामच्छोज्ञातपूर्वंसन्निधानेदेकातिः ॥ ४४ ॥ हुंकार-
गर्भमच्छच हृष्टात्समहेश्वरः ॥ जसंतास्तभयामास वाक्यमे तदुवाचह ॥ ४५ ॥ कस्त्वंमत्स्योदरस्थश्च देवो यक्षोथवामानुषः
॥ कथंजीवसिदेहान्तगतोममवप्रभो ॥ ४६ ॥ ॥ मात्स्यउवाच ॥ ॥ अहमत्स्योदरक्षिप्तः समुद्रक्षीरसम्भवः ॥ मान्नातु
पितृवाक्येन नाथममकुलान्तिः ॥ ४७ ॥ कुलक्षयभयात्तेनजातंस्वकुलनाशनम् ॥ गंडांतयोगजानितो वालानमू
हकमकृत् ॥ ४८ ॥ इतिमात्राः स्वित्यानिरस्तः शृणुवजजः ॥ झषेणापिगृहीतोऽस्मिकालोमेन्नमहानभूत् ॥ ४९ ॥ तव
वाक्यामृतैरभिज्ञानयोगोमहानेभूतः ॥ तेनत्वसकलोज्ञातो मयामूर्तोथमूर्त्तगः ॥ ५० ॥ अनुज्ञांममदेवेशदेहिनिष्कमणायच ॥
यथाहंपितृपाशेभ्यनुभयान्यास्पापिलस्यते ॥ ५१ ॥ हरउवाच ॥ ॥ थिमाऽसिकृतरूपाऽसिपूज्योऽस्यासिवभाषतः ॥ थहि
निष्क्रमवेगेनस्तम्भितोऽसिमहाझष ॥ ५२ ॥ ततोसौशिरसाजातो उत्कृष्टान्मत्स्ययोजितः ॥ ततोऽप्रकृतश्चक्षणाद्बहि-
रूपागतः ॥ ५३ ॥ रूपवान्मतिमान्शुभोमत्स्यगंधेनसंयुतः ॥ सोमकान्तिसमंतत्र अभवद्दिव्यगंधभाक् ॥ उमापिप्रणतायासु
स्कृततत्संगमाजनम् ॥ चकारतस्यामापिहरः परमहर्षितः ॥ ५५ ॥ अस्मान्मत्स्योदसज्जातोयोगिनांप्रवराह्वयम् ॥ तस्मात्तु
त्वंमत्स्यनाथोयलोकेख्यातोगमिष्यति ॥ ५६ ॥ अच्छेद्यः स्यान्नरतनुर्ज्ञानयोगस्यपारगः ॥ निर्मत्सरोऽपिनिर्द्वन्द्वो निराशोब्रह्मसे
वकः ॥ ५७ ॥ जीवन्मुक्तश्चभाविताऽवनानिचतुर्दश ॥ इत्युक्तंश्चमहेशानप्रणमेश्चपुनःपुनः ॥ ५८ ॥ महेश्वरेणसहितोसदरा
चलमाययौ ॥ ॥ ब्रह्मोवाच ॥ स्कन्दकृत्वदक्षिणादेवीस्कन्दमालिंग्यसोऽगमत् ॥ ५९ ॥ ततः सापार्वतीहृष्टाप्राप्यज्ञानमनुत्तमम् ॥ एवसाप

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मांसिद्धिंप्रणवस्यप्रभाजनम् ॥ ६० ॥संप्राप्यजगतांमाताद्वादशाक्षरजांबुना ॥ इमांमत्स्येंद्रनाथस्यचोत्पत्तिंयःशृणोतिच ॥
६१ ॥चातुर्मास्येविशेषेणसोऽश्वमेधफलंलभेत् ॥ ६२ ॥ ॥इतिश्रीस्कंदपुराणेब्रह्मनारद सवादेचातुर्मास्यमाहात्म्ये
मत्स्येंद्रनाथोत्पत्तिकथननाम एकत्रिंशोऽध्यायः ॥ ३१ ॥ ॥ ब्रह्मोवाच ॥ ॥कार्तिकेयश्चपार्वत्याःप्राणेभ्योप्यतिवल्लभः॥ संक्रीड-
तिसमीपस्थोनानाचेष्टाभिरुद्यतः ॥ १ ॥ रक्तकांतिर्महातेजाःषण्मुखोद्भुतविक्रमः ॥ क्वचिद्गायतिचात्यर्थंक्वचिन्नृत्यतिस्वेच्छ
या ॥ २ ॥मातरंपितरंदृष्ट्वाविनयावनतः क्वचित् ॥ क्वचिद्गंगापुलिनेसिकतालेपनाकृतिः ॥ ३ ॥गणैःसहविचिन्वानोविविधान
नवनभूरुहान् ॥ एवंसंक्रीडतस्तस्यदिवसाःपंचजज्ञिरे ॥ ४ ॥ततोदक्षमहेंद्राद्यातारकाद्भयविद्रुताः॥ महेशानस्तुवन्सर्वतारक-
स्यजिघृक्षया ॥ ५ ॥ चक्रुस्तेदेवसेनानांगंगाभासिगणैःसम ॥स्तस्यनुदेववाद्यानिपुष्पवर्षंपपातह ॥ ६ ॥ वन्हिस्तुस्वाददौशक्तिंहि
मवान्वाहनंददौ ॥सर्वदेवसमुद्भूतगणकोटिसमावृतः ॥ ७ ॥प्रणम्यमुनिसंघेभ्यःप्रययौरिपुविग्रहे ॥ तान्निवत्यानगर्याञ्चशंरव
दुर्धर्षोमतापवान् ॥ ८ ॥ ततस्तारकसैन्यस्यदैत्यादानवकोटयः ॥समाजग्मुर्नचपुरात्शंखनादभयातुराः ॥ ९ ॥स्ववाहनसमारूढा
सयत्ताबलदर्पिताः ॥देवाःसर्वेपियुयुधुःस्कंदतेजोपबृंहिताः ॥ १० ॥ तदादानवसैन्यानिनिजघानचसर्वशः ॥ विष्णुश्चक्रेणतांश्छि-
न्नाःपेतुरुर्व्यांसहस्रशः ॥ ११ ॥ ततोभग्नाश्चशतशोदानवानिहतास्तदा ॥नद्यःशोणितसंभूताजातावहुविधामुने ॥ १२ ॥तद्ब
सदानवबलंदृष्ट्वासयुद्धे रणे ॥ बभंजसद्योदर्पशोवाणजालरनेकधा ॥ १३ ॥शक्तिनायुध्यगर्गीन्याम्विक्षेपकुष्णाप्रेरिताः ॥स्कंद
प्रैसच्चायतारचक्रेतथैवस्वसात्म्याणात् ॥ १४ ॥शेषाःपातालमगमन्हतंदृष्ट्वाथतारकम् ॥ ततोदेवगणाःसर्वेसशक्रस्तस्यविक्र-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ममृ ॥ १५ ॥ देवदुंदुभयोनेदुः पुष्पवृष्टिः प्रकुर्वतः ॥ तेलब्ध्वा जयाः सर्वेमहेश्वरपुरोगमाः ॥ १६ ॥ सिषिचुः सर्वदेवानांसेनापत्यन्
णेश्वरम् ॥ ततः स्कंदसमालिंग्यपार्वतीहर्षगद्गदा ॥ १७ ॥ आगत्यानिसदाचक्रे त्वसरवीभिः समावृता ॥ एवंचतारकंहत्वासप्तमे
हनिबालकः ॥ १८ ॥ मंदराचलमासाद्यपितरासप्रहर्षयन् । उवाचसकलस्कंदः परमानंदनिर्भरः ॥ १९ ॥ कालेदाराक्रियांतस्यचिंत
यामासशंकरः ॥ सउवाचप्रसन्नात्मागांगेयंसस्मितद्युतिम् ॥ २० ॥ प्राप्तकालस्त्ववविभोपाणिग्रहणसंमतः ॥ कुरुदारान्समासाद्य
धर्मस्तेपुत्रसंमतः ॥ २१ ॥ क्रीडस्वविविधैर्भोगैर्विमानैः सहकामिकैः ॥ तच्छ्रुत्वाभगवान्स्कंदः पितरंवाक्यमब्रवीत् ॥ २२ ॥ अह
मेवाहिसर्वत्रदृश्यः सर्वगुणेषुच ॥ दृश्यादृश्यपदार्थेषुकिंगृण्हामित्यजामिकिम् ॥ २३ ॥ याः स्त्रियः सकलास्तास्तुपार्वत्यांताः समाहि
मे ॥ नराः सर्वेऽपिदेवेशभवद्रूपान्विलोकये ॥ २४ ॥ त्वंगुरुर्मेरक्षास्वपुनर्नरकमज्ञानात् ॥ येनज्ञातमिदंज्ञानंत्वत्प्रसादादखंडितम् ॥
२५ ॥ पुनरेवमहाघोरसंसाराब्धौनमज्जये ॥ दीपहस्तोयथावस्तुदृष्ट्वातत्परित्यजेत् ॥ २६ ॥ तथाज्ञानमवप्राप्ययोगीत्यजतिसंसृ
तिम् ॥ ज्ञात्वासर्वगतंब्रह्मसर्वज्ञंपरमेश्वरं ॥ २७ ॥ निवर्ततेक्रियाः सर्वायस्यतंयोगिनंविदुः ॥ विषयाल्लब्धचित्तानांवनेऽपिजायतेरतिः
॥ २८ ॥ सर्वत्रसमदृष्टीनांगृहेमुक्तिर्हिशाश्वती ॥ ज्ञानमेवमहेशानमनुष्याणांसुदुर्लभम् ॥ २९ ॥ लब्धज्ञानंकथमपिहातुंनानेव-
पातयेत् ॥ नाऽहमास्मिनमातामेनपितानचबांधवः ॥ ३० ॥ ज्ञानंप्राप्यपृथक्भावमापन्नोऽभवनेष्वहम् ॥ प्राप्यभाग्यमिदंदेवास्म-
भावात्त्वनार्हसि ॥ ३१ ॥ वक्तुमेवविधंवाक्यंमुमुक्षोर्मेनसंशयः ॥ यदाप्रहपरादेवीपुनःपुनरभाषत ॥ ३२ ॥ तदातौपितरौनत्वाग
तोऽसौक्रौंचपर्वतम् ॥ तत्राश्रमेमहापुण्येचचारपरमंतपः ॥ ३३ ॥ जजापपरमंब्रह्मद्वादशाक्षरबीजकम् ॥ पूर्वध्यानेनसर्वाणिवशी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत्स्नेंद्रियाणिच ॥ ३४ ॥ ममपासं प्रयकज्याऽज्ञानध्योगमभ्यासवान् ॥ सिद्धयस्तस्यनिर्विघ्नाअणिमाद्यायदागताः ॥ ३५ ॥ तदातार
सागणः क्रुद्धोवाक्यमेतदुवाचह ॥ ममाऽपिदुष्टभावेनयादियूयमुपागताः ॥ ३६ ॥ तदास्मत्समशातानांनाभिभूतकरिष्यथ
॥ एवंज्ञात्वामहत्शापियतोज्ञानमहोदयम् ॥ ३७ ॥ मत्तोऽपिज्ञानयोगेनस्कंदोऽप्यधिकभावभृत् ॥ विस्मयाविष्टहृदयः पार्वतीम
नुशिष्टवान् ॥ ३८ ॥ पुत्रशोकपराचोमाऽशुभैर्वाक्यामृतैर्हरः ॥ चातुर्मासस्यमाहात्म्यंसर्वपापप्रणाशनम् ॥ ३९ ॥ महेश्वरोवाम
धुकैटभारिर्हृद्याश्रिताध्यानमयाद्वितीयः ॥ अभेदबुद्ध्यापरमार्तिहंतारिपुःसएवाऽतिप्रियोभवेत्ततः ॥ ४० ॥ ॥ इतिश्री
स्कंदपुराणेब्रह्मनारदसंवादेचातुर्मास्यमाहात्म्येतारकासुरवधोनामद्वात्रिंशोऽध्यायः ॥ ३२ ॥ ॥ छ ॥ ॥ छ ॥
॥ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ ॥ तथाचश्रीलक्ष्मीनारायणार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥ ॥

हें पुस्तक मुंबईंत बापूसदाशिवशेटशेट्ये हेगिष्टे श्रीवर्धनकर यांणीं आपले छापखान्यांत छापिलें मिति श्रावण वद्य ३० शके १८०६ तारणनाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिचातुर्मास्यमाहात्म्यंसमाप्तिमगमत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu